Utrecht University Library
Partner in Science
Universiteit Utrecht

# Baudhâyana-G?hyasûtra

https://hdl.handle.net/1874/202460

Handschrift 27

Collectie Caland

Copie van het Baudhayanagrhyasūtram.

HS

CALAND 27

Copie van N° 66 uit Report on a search for Sanskrit and Tamil MSS 1893/94, N° 2
(Origineel: Grantha, 54 fol. Bevat de eerste 4 praśnas van het gṛhyasūtra — het geheele pitṛmedhasūtra.

N° 24: ontv. 11 Jul. 1904.

# बोधायनगृह्यसूत्रम्

(Door mij aangeduid als Elgmore)

हरिः ओं ॥ यथो एतद्धुतः प्रहुत आहुत शूलगवो बलिहरणम्प्रत्यवरोहणमष्टकाहोम इति सप्तपाकयज्ञसंस्था इति ता अनुव्याख्यास्यामः तत्र यद्धूयते स हुतो यथैतद्विवाहस्सीमन्तोन्नयनञ्चेति तत्र हि हूयते ऽथ यद्धुत्वा दीयते ऽथ यद्धुत्वा दत्त्वा चादीयते स आहुतो यथैतदुपनयनं समावर्तनञ्चेति तत्र हि हुत्वा दत्त्वादीयते ऽथ यच्छूले कृपनीश्य गव्यानिश्रपयन्ति स शूलगवो ऽथ यद्गृह्याभ्यो देवताभ्यो ऽन्नं सम्प्रकिरन्ति तद्बलिहरणमथ यद्दत्वा ब्रतन्नप्रत्यवरोहन्ति तत्प्रत्यवरोहणमथ यथेष्टकायामन्नं क्रियते सो ऽष्टकाहोम इति विवाहं व्याख्यास्यामः उदगयने आपूर्यमाणपक्षे पुण्ये नक्षत्रे युग्मान् ब्राह्मणान् वरान्प्रहिणोति ॥ १ ॥ प्रसुग्मन्ताधियसानस्यं सक्षणि वरेभिर्वराँ अभिषुप्रसीदत । अस्माकमिन्द्र उभयंजुजोषति — यत्सौम्यस्यान्धसो बुबोधतीति यतो ऽनुमन्त्रयते अनृक्षरा ऋजवस्सन्तु पन्था येभिस्सखायो यन्ति नो वरेयं समर्यमा सम्भगो नो निनीयात्स ञ्जास्पत्यँ सुयममस्तु देवा इत्यथ यदि दक्षिणाभिस्सह दत्तास्यान्नात्र वरान्प्रहिणुयात्ताम्प्रति गृह्णीयात् प्रजापतिस्त्रियां यश इत्येताभिः षड्भिरनुच्छ

न्दसं सर्वे मासा विवाहस्य शुचितपस्तपस्यवर्जं
मित्येके रोहिणी मृगशीर्षमुत्तरे फल्गुनी स्वातीति
विवाहनक्षत्राणि पुनर्वसू तिष्योहस्तश्रोणा रेवती
त्यन्येषां भूतिकर्मणां यानि चान्यानि पुण्योक्तानि नक्षत्रा
णि तेषु पूर्वेद्युरेव वृद्धिपूर्तेषु युग्मान्ब्राह्मणान्भोज
येत् प्रदक्षिणमुपचारः पुष्पफलाक्षतमिश्रैर्यवैस्ति
लार्थमुपलिप्य दध्योदनं सम्प्रकीर्य नान्दीमुखाः पि
तरः प्रीयन्तामिति वाचयित्वा धविवाह इति ब्राह्म
णानन्नेन परिविष्य पुण्याहं स्वस्त्यृद्धिमित्योङ्कार
पूर्वं त्रिस्त्रिरेकैकमाशिषं वाचयित्वा स्नातो हतवा
सा गन्धानुलिप्तस्स्रग्वी भुक्तवान् वृतो पाणिरपदाति
र्गत्वा वधूज्ञातिभिरतिथिवदर्चितः स्नातामहतवा
ससं गन्धानुलिप्तां स्रग्विणीं भुक्तवतीमिषुहस्तां दत्तां
वधूं समीक्षते। भ्रातृघ्नीं वरुणापतिघ्नीं ब्रह्मणस्प
ते। इन्द्रापुत्रघ्नीं लक्ष्म्यन्तामस्यै सवितस्सुव।
क्ष्यमाणो जपति अघोरचक्षुरपतिघ्न्येधि शिवाप
तिभ्यस्सुमनास्सुवर्चाः जीवसूर्देवकामा स्योना श
न्नो भव द्विपदे शञ्चतुष्पदे इत्यथैनामन्तरेण
भ्रुमके दर्भेण सम्मार्ष्टि इदमहं यात्वयि पतिघ्न्यल
क्ष्मीस्तान्निर्दिशामि इति दर्भन्निरस्यापउपस्पृश्याथै

नान्दक्षिणेहस्ते गृह्णाति मित्रोसीत्यर्थेनान्देवयजन मुदानयति। एकमिषे विष्णुस्त्वान्वेतु द्वे ऊर्जे विष्णुस्त्वान्वेतु। त्रीणिव्रताय विष्णुस्त्वान्वेतु चत्वारिमायोभवाय विष्णुस्त्वान्वेतु पञ्च पशुभ्यो विष्णुस्त्वान्वेतु षड्रायस्पोषाय विष्णुस्त्वान्वेतु सप्त सप्तभ्यः होत्राभ्यो विष्णुस्त्वान्वेतु इति सप्तमम्यदं मुपस्पृश्य संगृह्य जपति सखा यस्सप्तपदा अभूम सख्यन्ते गमेयं सख्याचेमा योषं सख्यान्मे मायोषा इति। प्रथमः।

आवेद्यार्घ्यं कुर्यान्मध्ये गारस्योदीच्चीन प्रतिवेष णा तारका उपस्तृणीते तास्व एतानि बहुगुणान्यु त्तरदिशानि वासांस्यास्तीर्य ते ऋत्विजः प्राङ्मुखा उपविशायदुत्तरपूर्वे देशे गारस्य प्रागकूलान्दर्भा न् संस्तीर्य तेष्वर्घ्यद्रव्याणि संसादयति यावन्त ऋत्विजस्तावन्ति कांस्यानि पात्राणि सापिधानानि तावतः कुर्चान्द्वावन्यौ परिगृह्यौ कूर्चौ दधिमधु घृतमापः पयो वस्त्रयुगानि कुण्डलयुगानि यस्यैगोः पयः चमसं स्रग लंकरणीयञ्चेति पवित्रे कृत्वा तूष्णीं संस्कृताभिरद्भिरुत्तानानि पात्राणि कृत्वा प्रोक्ष्य कूर्चे कांस्यन्निधाय तिरः पवित्रमद्धानयति दधि पयो वा द्वितीयं स द्विदं घृतं तृतीयं सूत्रविद्या द्विती

यँस्यात्चतुर्थँसचतुर्दशापःपञ्चमे सापाङ्क्ते वर्षीयसा
तेजोमयेनापिधाय नानापुरुषा अर्घ्यद्रव्याणि आददते
अन्वगनुसंव्रजिताः कूर्च इति कूर्चम्प्राह तस्य कूर्च इती
तरः प्रतिगृह्णाति तम्प्रदक्षिणं पर्यस्योदगग्रं चाउपवि
शति पुरस्तादेनं प्रत्यञ्चमपोहते राष्ट्रभृदस्याचार्या
सन्दीमात्वद्योषमिति अथास्मा उदपात्रमादाय कूर्चा
भ्याम्परिगृह्य पाद्या आप इति प्राह ता अभिमन्त्रयत आ
पः पादावनेजनीर्द्विषन्तन्नाशयन्तु मे अस्मिन्कुले ब्रह्मव
र्चस्यसानीति दक्षिणम्पादं पूर्वं ब्राह्मणाय प्रसारयति
सव्यं शूद्राय स्त्री प्रक्षालयति पुमानभिषिञ्चति वि
परीतमित्येके नियमात्पत्नीयजमानौ नद्घं धावयतो
वनेक्तुः पाणिं सम्मृशति मयि महो मयि भर्गो मयि भर्गो
मयि यश इति तस्या अप उपस्पृश्य मयीन्द्रियं वीर्य
मित्युच्चारतः वृसासानं प्रत्यभिमृशते पोब्राह्मिभिर्यवै
र्वा समुदायुस्तथैव कूर्चाभ्यां परिगृह्यार्हणीया आप इ
ति प्राह ता अभिमन्त्रयते आम आगां वर्चसा यशसा
सँसृजा पयसा तेजसा च तम्मा प्रियं प्रजानां कुर्वधिप
तिं पशूनामित्येकदेशमञ्जला वानीयमानमनुमन्त्रय
ते विराजो दोहोऽसि विराजो दोहमशीय मम पद्याय
विराज इति शिष्टाः पराचीर्निनीयमाना अनुमन्त्रयते

समुद्रं वः प्रहिणोमि स्वां योनिमभिगच्छत । अच्छिद्रः प्र
जया भूयासम्मा परासेचि मत्पय इति । अथ तथैव कू
र्चाभ्यां परिगृह्यो वस्तरणीया आप इति प्राह ताः पिब
त्यमृतोपस्तरणमसीति त्रिराचामेत् त्रिःपरिगृह्णीत्
द्विरित्येक आचान्ताया पावृत्ताया तथैव कूर्चाभ्याम्प
रिगृह्यार्घ्य इति प्राह मधुपर्क इति वा मधुपर्कम्प्रोक्ष्य म
नुमन्त्रयते त्र्यै विद्यायै यशोसि यशसो यशोसि ब्र
ह्मणो दीप्तिरसि तम्मा प्रियं प्रजानां कुर्वधिपतिम्पशू
नामिति तमुभाभ्यां हस्ताभ्याम्परिगृह्णाति ॥३॥ देवस्य
त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्याम्पूष्णो हस्ताभ्याम्प्रति
गृह्णामीति तस्मिन्यत्किञ्चिदापतितं स्यात्तदङ्गुष्ठेन
च महानाम्या चोपसङ्गृह्येमानिशान्निरस्यति नेष्ट
विद्धि क्रन्दामि याते घोरा तनूस्तया तमाविशायो
स्मान्द्वेष्टि यञ्च वयं द्विष्म इत्यथापउपस्पृश्य सर्वा
भिरङ्गुलीभिस्समुदायुत्य प्राश्नाति । यन्मधुनो म
धव्यपरमन्नाद्यं वीर्यन्तेनाहम्मधुनो मधव्येन पर
मेणान्नाद्येन वीर्येण परमोन्नादो मधव्योसानीति
त्रिः प्राश्नाति । त्रिरनुपिबच्छेषञ्च कुर्याद्यजमान
श्रेयांसमिच्छेत्तस्मै शेषं दद्यादाचान्तायापावृत्त
या तथैव कूर्चाभ्याम्परिगृह्यापिधानीया आप इति

प्राहताः पिबत्यमृतापिधानमसीति त्रिराचामेत्त्रिः परिमृ
जेद्विरित्येके आचान्तायापावृत्ताय गौरिति गां प्राहतामभि
मन्त्रयते। गौरस्यपहतपाप्मा पपाप्मानन्नुद मम चा
मुष्य चेत्युपवेत्तुर्नाम गृह्णाति। नानामहलम्भ्यो गाः प्राहे
कां होत्रकेभ्यस्सर्वेभ्यो वै काम विभवतो यः प्राहतस्मा
उपाकरोत्येकदेशं वा पायें जुहोत्यग्निः प्रथमः प्राश्नातु स
हि वेद यथा हविः शिवा अस्मभ्य मोषधीः कृणोतु वि
श्वचर्षणिरित्येकदेशमुपहरति तत्प्राश्नात्यग्निः प्रथमः
प्राश्नातु स हि वेद यथा हविः शिवा अस्मभ्यमोषधीः
अरिष्टमस्माकं कृणोत्वसौ ब्राह्मणो ब्रह्मणेषु इत्यथ यत्
उत्सृष्टं भवति तामनुमन्त्रयते। गौर्धेनुभव्या माता रुद्रा
णां दुहिता वसूनां स्वसादित्यानाममृतस्य नाभिः प्रणु
वोचं चिकितुषे जनाय मा गामनागामदितिं वधिष्ट पिब
तूदकं तृणान्यत्तु। ओमुत्सृजतेति तस्यामुत्सृष्टायाम्मेष
मजं वालभते। आरण्येन वा मांसेन न त्वेवामांसोऽर्घस्या
दशक्तौ पिष्टान्नं संसिध्येत् सिद्धे भूतमिति प्राहतस्सुभू
तमिति इतरः प्रत्याह तदभिमन्त्रयते भूतं सा विराट्
तन्मा क्षायि तन्मेशीय तन्म ऊर्जं धाः ओं कल्पयेति
ति चतुरो नानागोत्रान्ब्राह्मणान्भोजयते सेवं ब्रूयात्तेषु भु
क्तवत्सु अन्नमस्मा उपहरति तत्प्राश्नाति विराडसि विराडन्नं

विराड्विराजो मयि देहीति भुक्तवद्भ्यो वस्त्रयुगानि कु
ण्डलयुगानि य(स्यै) गोः पयश्च मसंसृगलंकरणीय
मिति च दद्यादेकधनमपष्टौ हीन्दद्यामित्येके प्राङ्म
धुपर्कादलङ्करणमित्येके स्मामनन्ति महयेदृत्विजमा
चार्यञ्चात्मानं वा एष मन्नयति यस्समृत्विजमाचार्यञ्च
महयत्येवं प्रतावात्सन्निकाः स्युः पतितोननूचान इति
निमित्तामिति वरणेग्न्याधेयप्रभृतिचैषामृत्विजं स्वरे
त्तथाचार्यं प्रथैते द्योऋत्विक्श्वशुरपितृव्यो मातुल
आचार्यो राजा स्नातकः प्रियो वरोतिथिरिति संवत्सर
पर्यागतेभ्य एतेभ्य एवं कुर्याद्विवाहवरायाथर्त्विग्भ्यः
कर्मणिकर्मणि ददाति ॥ ४ ॥ द्वितीयः ॥

अथ शुचौ समे देशे ग्न्यायतनदेशं शकलेन त्रिः प्रा
चीनमुल्लिखेत् त्रिरुदीचीनमथाद्भिरभ्युक्ष्य शकल
न्निरस्यापउपस्पृश्य याज्ञिकात्काष्ठादग्निम्मथित्वा श्रो
त्रियागाराद्वाहृत्य व्याहृतीभिर्न्युप्योपसमयायोप
तिष्ठते जुष्टोदमूना अतिथिर्दुरोण इमन्नो यज्ञमुप
याहि विद्वान्विश्वा ग्ने अभियुजो विहत्य शत्रूयतामाभ
राभोजनानीत्यथैनम्प्रदक्षिणमग्निम्परिसमूह्य
पर्युक्ष्य प्रागग्रैर्दर्भैरग्निम्परिस्तृणातीत्यपि वोदग
ग्राम्पश्चाश्च पुरस्ताच्च भवन्ति दक्षिणानुत्तरानुत्त

रानधरान्यतिप्रागुदगग्ना उत्तरेणाग्निम्प्रागग्रान्द
र्भान्सँस्तीर्य तेषु द्वन्द्वन्यञ्चि पात्राणि प्रसादयति दे
वसंयुक्तान्येकैकशः पितृसंयुक्तानसकृदेव मनुष्यसं
युक्तानि यत्सह सर्वाणि मानुषाणीति तस्याद्ब्राह्म
णास पवित्रे कृत्वा तूष्णीं संस्कृताभिरद्भिरुत्तानानि पा
त्राणि कृत्वा विसृज्य धर्म्मिरसर्वाभिः प्रोक्ष्य दर्भेषु
दक्षिणतो ब्राह्मणमुपवेशयति उत्तरत उदपात्रम
यतिरः पवित्रमाज्यस्थाल्यामाज्यन्निरूप्योदीचोऽङ्गा
न्निरूह्य व्यन्ताङ्कृत्वा तेष्वधिश्रित्याभिद्योतनेनाभिद्यो
त्य द्वे दर्भाग्रे प्रच्छिद्य प्रक्षाल्य प्रसस्य पुनरभिद्योत्य
त्रिः पर्यग्निकृत्वा वर्मकुर्वन्नुदगुद्वास्य प्रत्यूह्याऽङ्गा
रामथैनमुदीचीनाग्राभ्याम्पवित्राभ्याम्पुनराहारन्त्रि
रुत्पूय विसृस्य पवित्रे अद्भिस्संस्पृश्याग्नावनुप्रहर
त्यथ दर्वीन्निष्टप्य सम्मृज्याद्भिस्संस्पृश्य पुनर्निष्टप्य
निदधाति दर्भानद्भिस्संस्पृश्याग्नावनुप्रहरत्यथ
शम्याः परिदधाति खादिरदर्वी तेजस्कामस्यौदुम्बर
मन्नाद्यकामस्य पालाशी ब्रह्मवर्चसकामस्येत्यथ है
केषां विज्ञायते। निर्ऋतिगृहीता वै दर्वी यद्दर्व्यानु
हुयान्निर्ऋहास्य यज्ञं गाहयेत्तस्मात्स्रुवेणैव होत
व्यमिति पालाशेन स्रुवेणेति आत्रेयश्च खादिरेणे

त्याङ्गिरसः। ताम्रायसेनैत्याथर्वणः। कार्ष्णायसे
नाभिचरन्निति सार्वत्रिकमन्योवास्यैतावत्कुलाग
मनं कांक्षेदपरेणाग्निमुदीचीनं प्रतिबेवणामेरकां
साधिपासाभ्यास्तीर्य तस्यां प्राञ्चावुपविशत उत्तर
तःपतिर्दक्षिणापत्न्यथान्वारब्धायां प्रदक्षिणमग्नि
म्परिषिञ्चत्यदितेनुमन्यस्वेति दक्षिणतः प्राचीनम
नुमतेनुमन्यस्वेति पश्चादुदीचीनं सरस्वतेनुम
न्यस्वेत्युत्तरतः प्राचीनन्देव सवितः प्रसुवेति सम
न्तम्प्रदक्षिणं समन्तमेव वा तूष्णीमथेध्ममभ्यज्य
परिसमिधं शिनष्टि स्वाहाकारेणाधायाघारावाघारय
ति प्रजापतये स्वाहेति मनसोत्तरे परिधिसन्धौ संस्पृ
श्याक्ष्णया सन्ततमिन्द्राय स्वाहेत्युपांशु दक्षिणे परि
धिसन्धौ संस्पृश्याक्ष्णया सन्ततमथाज्यभागौ जु
होत्यग्नये स्वाहेति मनसोत्तरे परिधिसन्धावुत्तरा
र्धपूर्वार्धे सोमाय स्वाहेति दक्षिणार्धपूर्वार्धे थाग्नि
मुखं जुहोति॥ ६॥ युक्तो वह जातवेदः पुरस्तादग्ने
विद्धि कर्म क्रियमाणं यथेदं। त्वं भिषक् भेषजस्या
धिकर्ता त्वया गा अश्वान्पुरुषान्सनेम स्वाहा। च
तस्र आशाः प्रचरन्त्वग्नय इमं नो यज्ञं नयतु प्रजा
नन्। घृतं पिन्वन्नजरं सुवीरं ब्रह्मसमिद्भवत्याहु

तीनां स्वाहा। आनो भद्राः क्रतवो यन्ति विश्वतो दब्धासो अपरीतास उद्भिदः देवानो यथा सदमि द्वृधे असन्नप्रायुवो रक्षितारो दिवे दिवे स्वाहा विरूपाक्ष माविबाधिष्ठा माविबाध विबाध विबाधिनाः नित्रक्रसेवा पुत्र माहुरसनः कर्माणि साधय स्वाहा। विरूपाक्ष महं मयजे निजं घँशबलोदरम्। योमायम्परिबाधते श्रियै पुष्ट्यैवा नियतात स्मै स्वाहा। यानिरश्मीनि पद्यसेहं विधरणीइति ताक्वाध तस्य धारयाग्नौ सँराधिनीं यजे स्वाहा। सँराधिन्यै देव्यै स्वाहा। प्रसाधिन्यै देव्यै स्वाहा। भू स्वाहा। भुवस्वाहा। सुवस्वाहा। भूर्भुवस्सुवस्स्वाहेत्येतावत्सर्वं दर्विहोमानामेव कल्पः॥६॥ तृतीयः॥

अथास्याउपोष्याय दक्षिणेनहस्तेन दक्षिणमंसम्प्रति बाहुमन्ववहृत्य हृदयदेशमभिमृशति। मम हृदये हृदयन्ते अस्तु मम चित्ते चित्तमस्तु तेम मवाचमेकमनाइशृणु। मामेवानुव्रता सहचर्या भ याभवेत्यथा स्यै दक्षिणे कर्णे जपति मान्तेमनः प्रविशतु माञ्चक्षुर्मामृते भगः। मयि सर्वाणि भूतानि मयि प्रज्ञानमस्तु ते। मधु हे मध्वागाहे जिह्वा मे मधु वादिनी। मुखे मे सानयम्मधुः दन्तुसं

वनमंकृतं। चाक्रवाकं संवननं यन्नदीभ्य उदा
हृतं। यद्विन्तौ देवगन्धर्वौ देवसंवनने स्वः। स्पृशा
मि तेहमङ्गानि वायुरापश्च मापरः। मा त्वैव पश्यसू
र्यश्च मान्येषु मनः कृथाः। सोमः प्रथमो विविदे ग
न्धर्वो विविद उत्तरः। तृतीय अग्निष्टे पतिस्तुरीय
स्ते मनुष्यजाः। सोमो ददद् गन्धर्वाय गन्धर्वो दद
दग्नये। रयिञ्च पुत्रांश्चादादग्निर्मह्यमथो इमां स
रस्वती प्रेदमव सुभगे वाजिनीवती। तां त्वा विश्वस्य
भूतस्य प्रगायामस्यग्रत इत्यथास्यै दक्षिणेन नीचा
हस्तेन दक्षिणमुत्तानं हस्तं सङ्गुष्ठमभीवलोमानि
गृह्णाति। गृभ्णामि ते सुप्रजास्त्वाय हस्तम्मया पत्या
जरदष्टिर्यथासः। भगो अर्यमा सविता पुरन्धिर्म
ह्यन्त्वादुर्गार्हपत्याय देवा इत्यथैनामप्रदक्षिणम
ग्निम्पर्याणयति। परि त्वाग्ने पुरं वयं विप्रं सहस्य
धीमहि। धृषद्वर्णन्दिवे दिवे भेत्तारं भङ्गुरावत इ
त्यथ तथोपविश्यान्वारब्धायामुपयमनीर्जुहोत्य
ग्ने शर्धमहते सौभगाय तव द्युम्नान्युत्तमानि सन्तु।
सञ्जास्पत्यं सुयममाकृणुष्व शत्रूयतामभितिष्ठा महांसि स्वा
हा। सोमाय जनिविदे स्वाहा। गन्धर्वाय जनिविदे स्वा
हा। अग्नये जनिविदे स्वाहा। कन्यला पितृभ्यो यती

पतिलोकमवदीक्षामदास्वाहा। प्रेतोमञ्चादिनामुतस्सुब
द्धाममुतस्करद्यथेयमिन्द्रमीढ्वस्सुपुत्रासुभगासतीस्वाहा।
इमांत्वमिन्द्रमीढ्वस्सुपुत्रांसुभगाङ्कुरु। दशास्यांपुत्रानाधे
हिपतिमेकादशंकृधिस्वाहा। अग्निरैतुप्रथमोदेवतानां
सोस्यैप्रजाम्मुञ्चतुमृत्युपाशात्. तदयंराजावरुणोनु
मन्यतांयथेयंस्त्रीपौत्रमघन्नरोदास्वाहा। इमामग्नि
स्त्रायतांगार्हपत्यः प्रजामस्यैनयतुदीर्घमायुः। अशू
न्योपस्थाजीवतामस्तुमातापौत्रमानन्दमभिप्रबुध्य
तामियंस्वाहा. मातेगृहेनिशिघोषउत्थादन्यत्रत्वद्रु
दत्यस्संविशन्तुमात्वंविकेश्युरआवधिष्ठाजीवपत्नी
पतिलोकेविराजपश्यन्तीप्रजांसुमनस्यमानांस्वाहा।
द्यौस्तेपृष्ठंरक्षतुवायुरूरूअश्विनौचस्तनन्धयन्तंस
विताभिरक्षतु। आवाससःपरिधानाद्बृहस्पतिर्विश्वेदेवा
अभिरक्षन्तुपश्चात्स्वाहा। अप्रजस्तांपौत्रमृत्युम्पाप्मा
नमुतवाघं। शीर्ष्णस्स्रजमिवोन्मुच्य द्विषद्भ्यः प्रति
मुञ्चामिपाशंस्वाहेत्यथैनामुत्थाप्योत्तरेणाग्निंदक्षिणे
नपदाश्मानमास्थापयति॥ ६॥ आतिष्ठेममश्मानमश्मे
वत्वंस्थिराभव. अभितिष्ठपृतन्यतः सहस्वपृतना
यत इत्यथास्या अञ्जलावुपस्तृणाति. तस्यास्सोदर्यो
द्विर्लाजानावपतितानभिघार्यजुहोतीयंनार्युपब्रूते

शोलाजानावपति दीर्घायुरस्तु मे पति जीवातु शरद
ऽशतं स्वाहेत्यथैनां प्रदक्षिणमग्निम्प्रणयति तुभ्य
मग्ने पर्यवहन् सूर्यां वहतु. ना सह. पुनः पतिभ्यो जाया
न्दा अग्ने प्रजया सह इति तथास्थापयति तथा जुहोत्यथै
नां पुनः पर्याणयति पुनः पत्नीमग्निरदादायुषा सह व
र्चसा। दीर्घायुरस्या यः पतिस्स एतं शरदऽशतं इति त
थैवास्थापयति तथैवास्थापयति तथैवास्थापयति त
थाजुहोत्यथैनाम्पुनरेव पर्याणयति सुकिंशुका उत लयाव
धारा उदन्या इव. अतिगाहेमहि द्विष इत्यथोपविश्यान्वा
रब्धायां जयानभ्यातानान्राष्ट्रभृत इति च हुत्वा मास हो
मासहोमाञ्जुहोत्यथ प्राजापत्या ञ्जुहोति प्रजापते न
त्वदेतान्यन्यस यथैौ विष्टकृती ञ्जुहोति यदस्य कर्मणो
ऽत्यरीरिचं यद्वा न्यूनमिहाकरं. अग्निष्टत् स्विष्टकृद्विद्वान्
सर्वं स्विष्टं सुहुतं करोतु मेऽग्नये स्विष्टकृते सुहुतहुत आ
हुतीनां कामानां समर्धयित्रे स्वाहेत्यथ परिस्तरान्समु
लुप्याज्यस्थाल्याम्प्रस्तरवद्बर्हिरक्तान्यग्नावनुप्रहरति
अथ शम्या अपोह्य परिधीननुप्रहरति तथैव परि
षिञ्चत्यन्वमंस्थाः प्रासावीरिति मन्त्रान्तान्सन्नमय
त्यथ प्रणीताभ्यो दिशो व्युन्नीय ब्रह्मणे वरन्ददाति. गा
म्ब्राह्मणेभ्यो एष आघारावान् दर्वीहोमो अथा

परः। परिसमूह्य, पर्युक्ष्य, परिस्तीर्याज्यं विलाप्योत्पूय
स्रुकं स्रुवं निष्टप्य सम्मृज्य स्रुचि चतुर्गृहीतं गृहीत्वा, स
र्वान्मन्त्रान्समनुद्रुत्य सकृदेवाहुतिं जुहोत्यग्निः स्विष्टकृ
द्द्वितीयो द्विर्जुहोति द्विर्निमार्ष्टि द्विः प्राश्नात्यसृप्याचाम
ति निर्लेपमित्येष आग्निहोत्रिको थापरः परिसमूह्य
पर्युक्ष्य परिस्तीर्य प्राकृतेन हविषा यावदाम्नातमाहु
तीर्जुहोत्येष अपूर्वस्तत्रोदाहरन्ति। आचारम्प्रकृति
म्प्राण दर्वीहोमस्य बादरी आग्निहोत्रिकमात्रेयः का
शकृत्स्नस्त्वपूर्वतामिति तान्नमिथ्य संसाधयेदना
देशात्॥ ८॥ चतुर्थः॥ अनुनयन्त्येतमग्निमथैनाम्पि
तुरङ्गाद्दुह्वहति गुरोर्वा येव ध्वश्चन्द्रं वहन्तु यक्ष्माय
न्ति जनाँ अनु। पुरस्तान्यद्वियादेवा नयन्तु यत आग
ता इत्यथैनान्दक्षिणे हस्ते गृहीत्वा रथमारोप्य स्वान्
गृहानानयति। पूषा त्वेतो नयतु हस्तगृह्याश्विनौ त्वा
प्रवहतां रथेन गृहान्गच्छ गृहपत्नी यथासो वशिनी
त्वं विदथमावदासीति पन्थानमनुमन्त्रयते। सुगं
पन्थानमारुक्षमरिष्टं स्वस्तिवाहनम्। यस्मिन्वीरो न
रिष्यत्यन्येषां विन्दते वसु। स्योनं वधीं वनस्पतयो यान
घो यानि धन्वानि ये वना। ते त्वा वधु प्रजावतीं प्र त्वे मु
ञ्चन्त्वंहसः इत्यथ जायामानीय स्वान्गृहान् प्रवादय

ति। भद्रान्ग्रहान्सुमनसः प्रपद्ये वीरघ्नो वीरवतस्सु
वीरान्। इरां वहतो घृतमुक्षमाणास्तेष्वहं सुमना
स्संविशातीति अथैनामानडुहे चर्मण्युपवेशयती
ह गावः प्रजायध्वमिहाश्वा इह पूरुषाः। इहो सह
स्रन्दक्षिणो रायस्पोषो निषीदत्विति त्राभ्यामसासा
स्तोकानास्यारोपयन्त्यथ वाचं यच्छत। आनक्षत्राणा
मुदयादथाहोरात्रयोस्सन्धिमनुमन्त्रयते। नीललो
हिते भवतः कृत्यासक्तिर्व्यज्यते। एधन्ते स्याज्ञातयः
पतिबन्धेषु बध्यत इत्युदितेषु नक्षत्रेषु प्रानिष्क्र
म्य। ध्रुवमरुन्धतीञ्च दर्शयति। ध्रुवोसि ध्रुवक्षिति
ध्रुवमसि ध्रुवतः स्थितम्। त्वन्नक्षत्राणां मेध्यासि स
मा पाहि पृतन्यत इति ध्रुवं। सप्तर्षयः प्रथमां कृ
त्तिकानामरुन्धतीं यद्ध्रुवतां हनिन्युः षट्कृत्तिका
मुख्ययोगं वहन्तीयमस्माकमेधत्वष्टम्यरुन्धतीमरु
न्धतीः॥ १॥ पञ्चमः॥ आनयन्त्येनमग्निमथ देवय
जनोल्लेखनप्रभृत्या प्रणीताभ्यः कृत्वा पक्वमोद
नम्। पायसं वायाचयति तमसुद्ध्याग्नावधिश्रित्या
ज्यन्निर्वपत्यथाज्यमधिश्रायत्युभयं पर्यग्निकृ
त्वा। मेक्षणं स्रुवञ्च सम्मार्ज्याथैतञ्चरुं श्रपयित्वाभि
घार्योदञ्चमुद्वास्य प्रतिष्ठितमभिघारयति परिधानप्र

भ्रहाग्निमुखात्कृत्वा · पक्वाज्जुहोति · यस्त्वा हृदा किरिणा
मन्यमान इति पुरोनुवाक्यामनूच्य यस्मै त्वं सुकृते जात
वेद इति याज्यया जुहोति । यत्रैकाम्नाता स्यात्ता द्विरभ्या
वर्तयेत्तथा स्थाने स्विष्टाज्याहुतिरुपजुहोत्यग्ने प्रा
यश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणास्त्वा नाथ
कामः प्रपद्ये यास्याम्पतिघ्नी तनूः प्रजाघ्नी पशुघ्नी
लक्ष्मिघ्नी जारघ्नीं स्यैतां कृणोमि स्वाहा । वायोः प्रायश्चित्त
आदित्य प्रायश्चित्ते प्रजापते प्रायश्चित्ते त्वं देवानां +
णोमि स्वाहेति पक्वादेव स्विष्टवतीभ्यां सौविष्टकृतीम्
जुहोति · लाजैरुत्तरत्र हव्यवाहमभिमातिषाहं रक्षो
हणम्पृतनासु जिष्णुम् · ज्योतिष्मन्तं दीद्यतं पुरन्धि
मग्निं स्विष्टकृतमाहुवेमं स्विष्टमग्ने अभितत्पृणाहि
विश्वा देव पृतना अभिष्य · उरुन्नः पन्थाम्प्रदिशन्वि
भाहि ज्योतिष्मद्धेहि अजरन्न आयुः स्वाहेति जयप्रभृ
ति सिद्धमाधेनुवरप्रदानादथास्या आज्यशेषेण हि
रण्यमन्तर्धाय मूर्ध्नि संस्रावञ्जुहोति भूः स्वाहा भुव
स्स्वाहा सुवस्स्वाहा भूर्भुवस्सुवस्स्वाहेत्यथैना
म्प्रदक्षिणमग्निम्पर्याणयति ॥ – ९ ॥ अर्यम्णो अ
ग्निम्परि यन्तु क्षिप्रम्प्रतीक्षन्तां श्वश्रुवो देवराश्चेत्य
थ श्रीमन्नामगारं सम्मृष्टोपलिप्तं गन्धवन्नाम्पुष्पव

न्नान्ध्रूपवन्नन्दीपवन्नानल्पवन्तं साधिवासन्धि
क्षु सर्पिस्सूत्रेन्धनप्रद्योदितमुदकुम्भादर्शौ च्छि
र संप्रपाद्य तस्मिन्नेनां संवेश्य तस्या अन्ति
के जपत्युदीर्ष्वातो विश्वावसो नमसेडामहे त्वा-
अन्यामिच्छ प्रफर्व्यं सञ्जायाम्पत्या सृज। उदीर्ष्वा
तः पतिवती ह्येषा विश्वावसुन्नमसा गीर्भिरीट्टे
अन्यामिच्छ पितृषदं व्यक्ताँ स ते भागो जनुषा त
स्य विद्धि तस्थैनामुपसंवेशयति प्रजापतिः स्त्रियां
यश इत्येतयाथास्याः स्तोकौ ति विवृणोति प्रजायेते
ति सा यद्यश्रु कुर्यात्तामनुमन्त्रयते। जीवाँ रुदन्ति
विमयन्ते अध्वरे दीर्घामनुप्रसितिन्दीधियुर्नरः
वामम्पितृभ्यो य इदँ समेरिरे मयः पतिभ्यो जनयः
परिष्वजे इति ॥१०॥ षष्ठः॥ ब्राह्मणेन ब्राह्मण्यामुत्पन्नः प्रा
गुपनयनाज्जात इत्यभिधीयत उपनीतमात्रो व्रतानु
चारी वेदानां किञ्चिदधीत्य ब्राह्मण एकां शाखाम
धीत्य श्रोत्रियो ऽङ्गाध्याय्यनूचानः कल्पाध्यायी ऋषिकल्प
स्सूत्रप्रवचनाध्यायी भ्रूणश्चतुर्वेदादृषिरत ऊर्ध्वं
न्देवोऽथ यदि कामयेत श्रोत्रियञ्जनयेयमित्यारुन्ध
त्युपस्थानात्कृत्वा त्रिरात्रमक्षारलवणाशिनावध
श्शायिनौ ब्रह्मचारिणौ वासाते अहतानाञ्च वाससां

परिधानं सायम्प्रातश्चालङ्करणमिषुव्रतोदयोश्च धा
रणमग्निपरिचर्या च चतुर्थ्याम्पक्कहोमउपसंवेशन
ञ्चाथ यदि कामयेतार्षिकल्पञ्जनयेयमिति मासमेद्व्रत
ञ्चरेद्व्रतान्ते पक्कहोमउपसंवेशनञ्चाथ यदि कामये
तार्षिञ्जनयेयमिति षण्मास्यानेतद्व्रतञ्चरेद्व्रतान्ते प
क्कहोमउपसंवेशनञ्च अथ यथा मलवद्वाससा
वैनया सह संवदेत न सह शयीत नास्या अन्नमद्याद्
ब्रह्महत्यायै ह्येषा वर्णं प्रतिमुच्यास्ते थो खल्वाहुर
भ्यञ्जनं वाव स्त्रिया अन्नमभ्यञ्जनमेव प्रतिग्राह्यं
काममन्यदिति वैनामुपेयान्नारण्यं न पराचीन्नस्ना
तिनाभ्यङ्क्तेन प्रलिखेत नाभ्यङ्क्ते न दतो धावते न खा
नि निकृन्तेत न तृणं छिनत्ति न रज्जुं सृजति न पर्णेन पि
बति तस्यै खर्वस्तिस्रो रात्रीर्व्रतञ्चरेदञ्जलिना वा
पिबेदखर्वेण वा पात्रेण प्रजायै गोपीथायेति ब्रा
ह्मणञ्चतुर्थ्यां स्नातायां निशायामलङ्कृतशयने
ऽभिमन्त्रयेत ॥ ११ ॥ विष्णुर्योनिं कल्पयतु त्वष्टा रू
पाणि पिंशतु आसिञ्चतु प्रजापतिर्धाता गर्भं दधा
तु ते यथाग्निगर्भा पृथिवी द्यौर्यथेन्द्रेण गर्भिणी वा
युर्यथा दिशां गर्भ एवं गर्भं दधातु ते गर्भं धेहि सि
नीवालि गर्भं धेहि सरस्वति गर्भं ते अश्विनावुभावा

घचाम्पुष्करस्रजौ। हिरण्ययी अरणी यन्निर्मन्थतो
अश्विना। तन्ते गर्भन्दधाम्यहं दशमे मासि सूतवे
नेजमेष परापत सुपुत्रः पुनरापत अस्यै मे पुत्रका
मायै गर्भमाधेहि यः पुमानित्यथैनां परिष्वजत्यमूह
मस्मि सा त्वं द्यौरहं पृथिवी त्वं सामाहमृक्त्वमावे
हि सम्भवाव सह रेतो दधावहै पुंसे पुत्राय वेत्त
वै रायस्पोषाय सुप्रजास्त्वाय सुवीर्यायेत्यात्मानमभ्य
भिमृशति हं गर्भन्दधामोषधीष्वहं विश्वेषु भुवनेष्व
न्तः अहम्प्रजा अजनयम्पितृणामहञ्जनिभ्यो अपरी
षु पुत्रानित्यथैनामुपैति त्वाम्पूषञ्छिवतमामेरयस्व
यस्याम्बीजं मनुष्या वपन्ति या न ऊरू उशती विश्रयाते
यस्यामुशन्तः प्रहरेम शेफमिति स एवमेव चतुर्थीप्र
भृत्या षोडशीमुत्तरां युग्मामुपैति प्रजानिःश्रेयससम्
तुगमनमित्याचार्यास्सर्वाण्यु गमनानि मन्त्रव
न्ति भवन्तीति बोधायनो यच्चादौ यच्चान्ते विति शालि
किः॥ ~ १२॥ सप्तमः॥ अथाश्याम्पञ्चमेहनि नापित
कर्म कुर्वन्ति नापिताय पयोदनन्दत्वा ग्रामात्प्राचीं वो
दीचीं वा दिशमुपनिष्क्रम्य यत्रैकमुदुम्बरमूलम्परश्य
न्ति तं प्रदक्षिणम्परिसमूह्य प्रदक्षिणं गन्धैरनुलिम्प
न्जपति यथा त्वं वनस्पते ऊर्जा व्युक्षित उशातव त्वो

विरोहस्येवं पुत्रैश्च पशुभिश्च सहस्रवल्शा वि वयं रुह
मेत्ययैनं सुमनोभिः प्रच्छादयति यथा त्वं वनस्पते फ
लवानस्येवम्पुत्रैश्च पशुभिश्च फलवन्तो भवानीत्यत्रैव
त्रिवृतान्नेन बलिमुपहरति मन्त्रश्चोदाहरन्ति ऊर्ज
स्वान्पयस्वान् पयसा पिन्वमाना नस्मान्वनस्पते पय
सा म्याबावृत्स्वेत्यन्नं संस्कृत्य ब्राह्मणान् सम्पूज्याशि
षो वाचयित्वा जानुदघ्नमुदकमवतीर्य प्राचीनदशे
नाहतेन वाससा मत्या गच्छतो ब्रह्मचारिणम्पृच्छतो
ब्रह्मचारिन् किम्पश्यसीति स पृष्टः प्रतिब्रूयात् पुत्रां
श्च पशूंश्चेति अथैतान्मस्यानुदुम्बरमूले बकानाम्ब
लिमुपहरति दीर्घायुत्वाय वर्चस इत्यत्रैव निर्माल्या
नि परिभुक्तानि वासांसि प्रतिसरांश्च प्रतिमुच्योदुम्बर
शाखायां संसृजत्यथावगाह्यान्योन्यस्य पृष्ठे धाव
यित्वोदकान्ताम्प्रतियोति प्रतियुतो वरुणस्य पाशः
प्रत्यस्तो वरुणस्य पाश इत्यन्योन्यमलङ्कृत्य रक्ता
नि वासांसि परिधायाहतानि वा ततएति यानेन प
द्भ्यां वा गृहं गत्वा प्रक्षालितपाणिपादानप आचम्य
वाग्यतौ शयनमारभेते श्वोभूते वैश्वदेवेन प्रतिप
द्येत मासि श्राद्धेन चापरपक्षे ॥ १३ ॥ विज्ञाते गर्भे तिष्ये
पुंसवनम्ब्राह्मणानन्नेन परिविष्य पुण्याहं स्वस्त्यृद्धि

मिति वाचयित्वाथ देवयजनोल्लेखन प्रभृत्याग्निमुखां कृत्वा पक्वाज्जुहोति प्रजापते तन्वम्मे जुषस्वत्वष्टुर्देवे भिस्सह साम इन्द्र विश्वैर्देवै रातिदिभिस्सरराणः पुंसा म्बहूनाम्मातरस्यामस्वाहेत्यथाज्याहुतीरुप जुहोति गर्भो अस्योषधीनामिति तिसृभिरनुच्छन्दसं स्वि ष्टकृत्प्रभृति सिद्धमाधेनुवरप्रदानादथास्या आज्य शेषमास्ये प्रश्च्योत यत्त्वस्मे देवासो वपुषे चिकित्सतेति चतसृभिरनुच्छन्दसम्॥ १४॥ प्रथमगर्भायाश्चतु र्थे मासि सीमन्तोन्नयनं ब्राह्मणानन्नेन परिविष्य पुण्या हं स्वस्त्यृद्धिमिति वाचयित्वाथ देवयजनोल्लेखन प्रभृ त्यग्निमुखां कृत्वा पक्वाज्जुहोति धाता ददातु नो रयि मिति पुरोनुवाक्यामनूच्य धाता प्रजाया उत रायईशे इति याज्यया जुहोत्यथाज्याहुतिरुपजुहोति धाता ददातु नो रयिम्प्राचीमित्येतानुवाकस्य स्विष्टकृत्प्रभृति सिद्धमाधेनुवरप्रदानादथास्यै स्त्रेण्या शलल्या त्रि भिर्दर्भपुञ्जीलैरुदुम्बरप्रसूनैर्यवप्रसूनैरिति केशा न्विभजन्सीमन्तमुन्नयति राकामहं यास्ते राके इति द्वाभ्यामथास्यै यवप्रसूतान्याबध्नाति यवोसि यवयास्म द्द्वेषो यवयारातीरिति अथैनौ वीणागाथिनौ प्रतिगृ हीतावथैनौ शास्ति गायतमिति तावेतां गाथां गायत

ऽमिति तावेतां गाथां स्सोमएव नोराजेत्याहुर्ब्राह्मणः
प्रजाः विवृत्तचक्रा आसीना स्तीरे णासौ तवेति यस्य
नद्यास्तीरं संश्रिता वसन्ति तस्यै नाम गृह्णाति अष्टमे
मासि विष्णवे आहुतीर्जुहोति विष्णोर्नुकमित्येतेन सू
क्तेन विष्णवे बलिमुपहरति वैष्णवो ह्यष्टमो मासो विज्ञाय
ते विष्णुर्हि गर्भस्य देवतेति हुतो व्याख्यातः॥ १६॥
अथैतद्धुतबलिहरणं विष्णवे बलिरष्टमे मासि पूर्वप
क्षस्य सप्तम्यां द्वादश्यां रोहिण्यां श्रोणायां वा ब्राह्मणा
नन्नेन परिविष्य पुण्याहं स्वस्त्यृद्धिमिति वाचयित्वाथ दे
वयजनोल्लेखन प्रभृत्या प्रणीताभ्यः कृत्वोपोक्षायाग्ने
णाग्निं देवतमावहयों भूः पुरुषमावाहयाम्यों भुवः पु
रुषमावाहयाम्यों सुवः पुरुषमावाहयाम्यों भूर्भुव
सुव स्सुवः पुरुषमावाहयामीत्यावाह्यापरिषान प्रभृ
त्याग्निमुखात्कृत्वा दैवतमर्चयत्यापोहिष्ठामयोभुव
इति तिसृभिर्हिरण्यवर्णाश्शुचयः पावका इति चतसृ
भिः पवमानस्सुवर्जन इत्यनेनानुवाकेन मार्जयित्वा
द्भिस्तर्पयति केशवन्तर्पयामि + दामोदरन्तर्पयामीत्येतै
रेव नामधेयैर्गन्धपुष्पधूपदीपैरमुष्मै नम इत्यभ्यर्च्य
विष्णव आहुतीर्जुहोति विष्णोर्नुकन्तदस्य प्रियं प्रत
द्विष्णुः परोमात्रया विचक्रमे त्रिर्देव इति जयस्विष्टक

प्रश्नक्लिसिद्धमाधेनुवर प्रधानादथ गुळपायसं घृत
मिश्रमित्यथान्नस्य बलिमुपहरत्यमुष्मै स्वाहा नमोऽमुष्मै
स्वाहेति नम इति द्वादशाभिर्यथालिङ्गं वैष्णवीभिः ऋग्य
जुस्सामाथर्वभिस्तुतिभिस्तुन्वन्ति पुमानस्ये जायत इति
विज्ञायते व्याहृतीभिः पुरुषमुद्दास्यान्नशेषम्पत्नीम्प्रा
शयेत् पुमानस्ये जायत इति विज्ञायते ॥ १८ ॥ यथैतद्धु
ते बलिहरणं प्रथमगर्भायाश्चतुर्थेमासि विज्ञाते गर्भे
तिष्ये पुंसवनं अथाश्याम्पञ्चमेहनि विष्णुर्योनिं कल्प
यतु ब्राह्मणेन ब्राह्मण्यामुत्पन्नः अयमग्निः आनयन्ते
तमग्निं आतिष्ठेमं अथास्या उपोक्षाय युक्तो वह अथ
शुचौ देवस्यत्वा आवेघादयं कुर्यात् यथोऽएतद्धुतो प्र
हुतः ——— प्रथमः प्रश्नः ॥

अथ प्रहुतो जातं कुमारमभिमन्त्रयते ह्यसंभूत इस
नेनानुवाकेनाथैनं स्वोपस्थ आदधाति स्नापयति क्षेत्रि
येत्वा निरृत्यै त्वेति बडिंभरनुच्छन्दसमथैनं स्वोपस्थ आ
दधाति अङ्गादङ्गात्संभवसि हृदयादधिजायसे आत्मा
वै पुत्रनामासि स जीव शरदश्शतमित्यथैनम्मूर्ध्नि अ
भिजिघ्रति अश्मा भव परशुर्भव हिरण्यमस्रुतं भव
पशूनां त्वा हिङ्कारेण ब्रह्मणाभिजिघ्राम्यसाविति नक्ष
त्रनामधेयेनाथास्य दक्षिणे कर्णे जपत्यग्निरायुष्मा

नितिपञ्चभिः पर्यायैरथैनन्दधिमधुघृतमितिसमु

दायुत्सहिरण्येनप्राशयति प्राणोरक्षतिविश्वमेजदि

त्येतेनानुवाकेन प्रत्यृचमतिशिष्टंगोपदेनिनीयति व्या

हृतीभिरथैनम्मातुरुपस्थ आदधाति सीदन्नाम्मातुरस्या

उपस्थे इति चतसृभिस्सत्ंसाभिस्तनमभिमन्त्रयते

यस्तेस्तनश्शशयोयोमयो भूर्येन विश्वा पुष्यसिवीर्याणि

यो रत्नधावसुविद्यः सुदत्रस्सरस्वती तमिह धातवेक

रिति धयन्तमनुमन्त्रयते द्यौस्तेपृष्ठं रक्षतु वायुरूरू अ

श्विनौस्तनन्धयन्तं सविताभिरक्षतु आवाससः परिधा

नाद्बृहस्पतिर्विश्वेदेवा अभिरक्षन्तु पश्चादिसयास्यो

दकुंभमुशिरसि निदधात्यापस्सुप्तेषु जाग्रतरक्षाँसि

निरितोनुदध्वमित्यत ऊर्ध्वायज्ञोपवीत्यथदेवयज

नोल्लेखन प्रभृत्याग्निमुखात्कृत्वा पक्वाज्जुहोति हरिँह्यस्त्वा

मनुयन्ति देवा इति पुरोनुवाक्यामाचितो मृत्यो मावधी

रिति याज्ययाजुहोत्ययाज्याहुतीरुप जुहोति सद्यश्च

कामान्नयेस्यात्तादनुवाकस्याश्विन्कृप्रभृतिसिद्धमा

धेनुवरप्रदानात् ॥ २ ॥ अथानो युगंरथ युगं वास्त्वा

प्याच्छाद्याल ङ्कृत्याग्रेणाग्निमुच्छ्रित्य तस्याग्रेणा

श्वत्थपर्णेषु हुतशेषन्निदधाति नम आव्याधिनीभ्य

इत्यथास्तमित आदित्ये गौरसर्षपान् फलीकरणमि

श्रानञ्जलिना जुहोति कृणुष्व पाजः प्रसितिन्न पृथ्वीं वा
हिस्यैतेनानुवाकेन प्रक्षाल्यमथोदन्नतिलसक्तुभिश्शृतै
नेति समुदायुत्यगोष्ठेऽश्वत्थपर्णेषु हुतशेषन्निदध्याद्
घोरायमघोनाशिवेनजम्भेषायनमोनमइत्य यातिशि
ष्टं सर्वा दिशस्सम्प्रकिरत्याखाशिनी व्यश्रुमुखी कुतूहली
कस्तलिनी जृम्भिणी स्तम्भिनी मोहिनी च कृष्णा विशाखा
विमला ब्रह्मरात्रि भ्रातृव्यसंस्थेषु पतन्तु मोघाः. ताभ्यो
वै मातृभ्यो नमो नम इति स एवमेव फलीकरण होमप्र
भृति सायम्प्रातर्दशरात्रं कुरोति तानुत्थिताया सूतिका
यां भोज्यान्नता दशम्यामुत्थानं दशम्यां द्वादश्यां वा नाम
करणम्प्राजापत्येन सूक्तेन हुत्वा ब्राह्मणानन्नेन परिवि
ष्य पुण्याहं स्वस्त्यृद्धिमिति वाचयित्वा नामास्मै ददाति ।
द्व्यक्षरं चतुरक्षरं षडक्षरमष्टाक्षरं वा घोषवदाद्यन्त
रन्तस्थं दीर्घाभिनिष्ठानान्तमपि वा यस्मिन्स्वस्युपसर्ग
स्यात्तद्धि प्रतिष्ठितमिति विज्ञायते ऋष्यणूकं देवताणू
कं नायथैवैषाम्पूर्वपुरुषाणां नामानि स्युरयुगाक्षरं
कुमार्या अमुष्यै स्वस्त्वाति ॥ २ ॥ प्रथमः ॥ चतुर्थे मास्युप
निष्क्रमणं ब्राह्मणानन्नेन परिविष्य पुण्याहं स्वस्त्यृद्धि
मिति वाचयित्वाथ देवयजनोल्लेखन प्रभृत्याग्निमु
खात्कृत्वा स्वस्त्यात्रेयं जुहोति स्वस्तिनो ममीतामिति पृष्ठा

भिरनुच्छन्दसं स्विष्टकृत्प्रभृति दानोदयोपनिष्क्रम्य वा
ह्यानि चित्राणि अभ्यर्च्य त्रिवृतान्नेन ब्राह्मणान्सम्पूज्या
शिषो वाचयित्वा प्रदक्षिणीकृत्य स्वान्गृहान्नयति ॥
३ । द्वितीयः ॥ षष्ठे मास्यन्नप्राशनं ब्राह्मणानन्नेन परिवि
ष्य पुण्याहं स्वस्त्यृद्धिमिति वाचयित्वाथ देवयजनोल्लेख
न प्रभृत्याग्निमुखान्तं कृत्वा न्नसूक्तेन जुहोत्यहमस्मि प्र
थमजा ऋतस्येत्यष्टाभिरनुच्छन्दसं स्विष्टकृत्प्रभृति
सिद्धमाधेनुवरप्रधानाद्दध्योदनं दध्ना मधुना घृतेना
द्भिरिति समुदायुत्य हिरण्येनौषधस्य कुमारं प्राशयति
या जाता ओषधय इति षड्भिरनुच्छन्दसं भूर्भुवस्सु
वरपां त्वौषधीनां रसं प्राशयामि शिवास्त आप ओष
धयस्सन्त्वनमीवास्त आप ओषधयस्सन्त्विति सर्वा
स्वनुजुषति ॥ ४ ॥ तृतीयः ॥ संवत्सरे चूडाकर्म त्रि
षु वा संवत्सरेषु ब्राह्मणानन्नेन परिविष्य पुण्याहं स्वस्त्य
द्धिमिति वाचयित्वाथ देवयजनोल्लेखनप्रभृत्यग्निमु
खान्तं कृत्वा पक्वाज्जुहोति येकेशिनः प्रथमास्सत्रमासत
इति पुरोनुवाक्यामनूच्य नक्के ब्रह्मणे इति याज्यया जु
होति अथाज्याहुतीरुपजुहोत्यारोहत्प्रोष्ठे विषहस्वश
त्रूनित्यान्नादनुवाकस्य प्रत्यृचं स्विष्टकृत्प्रभृति सिद्ध
माधेनुवरप्रधानात्तथाग्नेणाग्निमुदुम्बरवर्णेषु हुतशे

षन्निदधाति। नमो हिरण्यबाहव इत्यपरेणाग्निमुभ
यीस्पसन्निविश्यास्युष्णास्सुशीता आनयत्युष्णेन वाय
उदकेनेह्यदिति केशान्वपतीति ताभिरस्य शिरउ
नत्याप उन्दन्तु जीवसे दीर्घायुत्वाय वर्चस इत्युत्तराभि
र्बहिरनुच्छ्रय सोऽवधे त्रायस्वैनमिति क्षुरमभिम
न्त्रयते। ज्योक्च सूर्यन्दृशे इत्यथैन निर्यश्च निद
धाति। स्वधिते मैनं हिंसीरित्यथास्य केशान्वपति ये
नावपत्सविता क्षुरेणेति प्रवपतोऽनुमन्त्रयते। माते
केशाननुगाद्दर्चन्तानदित्यैनान्समुच्छित्य दर्भ
स्तम्भे निदधाति। तेभ्यो निधानं बहुधा व्यैच्छन्नि
त्यथैनमुष्णोदकेनाप्लावयति। बलन्नो बाहुवोस्सवि
ता दधात्विति अथैनमेकशिखस्त्रिशिखः पञ्चशि
खो वा यथैवैषां कुलधर्मस्यादथ उर्द्दिशिखान्निदधा
तीत्येके अथैनं स्नाप्याच्छाद्यालङ्कृत्य त्रिवृतान्ने
न ब्राह्मणान्संपूज्याशिषो वाचयतीति प्राहुतो व्याख्या
तः॥ ६ [५]॥ चतुर्थः॥ अथाहुतो गर्भाष्टमेषु ब्राह्मणमुपन
यीत। गर्भैकादशेषु राजन्यं गर्भद्वादशेषु वैश्यम्।
आषोडशाद्ब्राह्मणस्यानातीत इत्येक एवमेवेतरयो
र्द्वाविंशतिश्चतुर्विंशतिश्चाथापि काम्यानि भवन्ति।
सप्तमे ब्रह्मवर्चसकामम् अष्टम आयुष्काममतोतम्परि

~~धापयन्वाचयति । या आक्रान्तान्नवयन्त्या अतन्वत~~

धापयन्वाचयति । या आक्रान्तान्नयन्त्या अतन्वत
याश्चदेवीरन्तानभितोददन्तं तास्त्वादेवी जरसे पृत
न्यतस्सहस्व पृतनायत इत्यथैन निष्क्रिवासस्सद्य
स्कन्नवमे तेजस्काम न्दशमेन्नाद्यकाममेकादशा इ
न्द्रियकामन्द्वादशे पशुकाम न्त्रयोदशे मेधाकाम
ञ्चतुर्दशे पुष्टिकामं पञ्चदशे भ्रातृव्यवन्तं षोडशे
सर्वकाममिति वसन्ते ब्राह्मणमुपनीयीत ग्रीष्मे
राजन्यं शरदि वैश्यं वर्षासु रथकारमिति सर्वानेव
वसन्ते ब्राह्मणानन्नेन परिविष्य पुण्याहं स्वस्त्य
द्धिमिति वाचयित्वा कुमारं भोजयित्वा तस्य चौलव
त्तूष्णीं केशान्नोप्य स्नातं शुचिवाससं बद्धशिखं
यज्ञोपवीतं प्रतिमुञ्चन्वाचयति यज्ञोपवीतं
परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तादायुष्य
मग्रियं प्रतिमुञ्च शुभ्रं यज्ञोपवीतं बलमस्तु
तेज इति यज्ञोपवीतिनमप आचमय्य देवय
जनमुदानयति अथ देवयजनोल्लेखन प्रभृत्या
ग्निमुखान्तं कृत्वा पालाशीं समिधमाज्येनाक्ताम्भ्या
धापयन्वाचयत्यायुर्दा देव जरसं गृणानो घृतप्रती
को घृतपृष्ठो अग्ने घृतम्पिबन्नमृतं चारुगव्यं

पितेव पुत्रञ्जरसे नयेमँ स्वाहेत्यथैनमुत्थाप्योत्तरे
णाग्निन्दक्षिणेन पदाश्मानमास्थापयत्यातिष्ठेमम
श्मानमश्मेव त्वँ स्थिरो भव· अभितिष्ठ संव्ययं त्व·
आयुष्मानिदम्परिधत्स्व वासौ भवाहर इति परिहि
तमनुमन्त्रयते· परिधत्त धत्त वाससैनं शतायुषं
कृणुत दीर्घमायुः बृहस्पतिः प्रायच्छद्वास एतत्
सोमाय राज्ञे परिधातवा उ जरान्गच्छासि परिधत्
स्व वासो भवा कृषीनामभिशस्तिपावा। शतञ्च जीव
शरदस्सुवर्चा रायश्च पोषमुपसंव्ययस्व - परीदं वासो
अधिया स्वस्तये भूरापीनामभिशस्तिपावा - शतञ्च
जीव शरदः पुरूचीः· पर्वसूनि चार्यो विभजासु जीव
न्नित्यथैनम्मौञ्जीम्मेखलान्त्रिवृतान्त्रिप्रदक्षिणं परि
व्ययन्वाचयति मौञ्जी ब्राह्मणस्य ज्यामौर्वी राजन्यस्य
आविसूत्रं वैश्यस्य सर्वेषां वा मौञ्जीमियन्दुरुक्तात्प
रिबाधमाना शर्म वरूथम्पुनती न आगात्प्राणापाना
भ्याम्बलमाभरन्ती प्रिया देवानाँ सुभगा मेखलेयमि
ति परिवीतामनुमन्त्रयते· ऋतस्य गोप्त्री तपसः
परस्वी घ्नती रक्षस्सहमाना अरातीः सा नस्समन्त
मनुपरीहि भद्रया भर्तारस्ते मेखले मा रिषामेति
ग्रन्थिं करोति· प्राणानां ग्रन्थिरसि स मा विस्रस इति

नाभिदेशे थास्माजिनं प्रतिमुञ्चन्वाचयति कृष्णाजि
नं ब्राह्मणस्य रौरवं राजन्यस्य बिस्ताजिनं वैश्यस्य
सर्वेषां वा कृष्णाजिनं मित्रस्य चक्षुर्धरुणम्बलीय
स्तेजो यशस्वि स्थविरँ समिद्धम् अनाहनस्यं वस
नञ्जरिष्णु परीदं वाज्यजिनन्दधेहमित्यथास्मै दण्डं
प्रयच्छति पालाशं बैल्वं वा ब्राह्मणस्य नैयग्रोधस्क
न्धजमवाग्ग्रं रौहितकं वा राजन्यस्य बादरमौदु
म्बरं वा वैश्यस्य सर्वेषां वा वार्क्षं सोमोसि सोमपन्था
कुर्विति पालाशं ब्रह्मवर्चसमसि ब्रह्मवर्चसायलेति
बैल्वमोजोस्योजो मयि धेहीति नैयग्रोधम्बलमसि
बलम्मयि धेहीति रौहितकं पुष्टिरसि पुष्टिम्मयि धेही
ति बादरमूर्जस्यूर्जम्मयि धेहीति औदुम्बरं अहं
वृक्षस्य रेरिवा कीर्तिः पृष्ठं गिरेरिव ऊर्ध्वपवित्रो वाजि
नेव स्वमृतमस्मि द्रविणँ सवर्चसमिति वार्क्षं कोना
मास्यसौ नामास्मीति शाट्यायनकमथैनन्दक्षिणे ह
स्ते गृह्णाति यस्मिन् भूतञ्च भव्यञ्च सर्वे लोकास्स
माहिताः तेन गृह्णामि त्वामहम्मह्यं गृह्णामि त्वामहं प्र
जापतिना त्वा मह्यं गृह्णाम्यसौ इत्यथैनन्देवताभ्यः
परिददाति देवस्य त्वा सवितुः प्रसवेश्विनोर्बाहुभ्यां
पूष्णो हस्ताभ्यामुपनये सावित्र्यथ कुमारः पवत्र्जुहोति

देवेभ्यस्त्वा परिददामि विश्वेभ्यस्त्वा देवेभ्यः परिद
दामि सर्वेभ्यस्त्वा देवेभ्यः परिददामि सर्वाभ्यस्त्वा
देवताभ्यः परिददाम्यसावित्यथैनमुपनयति ॰
६॥ यश्छन्दसामृषभो विश्वरूपः छन्दोभ्योऽध्य
मृतात्संबभूव समेन्द्रो मेधया स्पृणोतु अमृतस्य
देवधारणो भूयासँ स्वाहेत्याज्याहुतीरुपजुहो
ति क्षेत्रियै त्वा निर्ऋत्यै त्वेति षड्भिरनुच्छन्दसमे
व ब्रह्मसूक्तेन जुहोति ब्रह्मजज्ञानमिति षड्भिः स्वि
ष्टकृत्प्रभृति सिद्धमाधेनुवरप्रदानादथाग्रेणाग्नि
म्पलाशपर्णेषु हुतशेषन्निदधाति नमो अस्तुनी
लग्नावायेत्यत्र सावित्रीव्रतं पालाशाश्चतस्रस्समि
ध आधास्सपलाशास्सप्रारोहः प्रादेशमात्रीरप्र
तिशुष्काग्रा घृतान्वक्ता व्याधापयन्वाचयति
याज्ञिकानां वा वृक्षाणामन्यतमस्याग्ने व्रतपते सा
वित्रं व्रतञ्चरिष्यामि तच्छकेयन्तन्मे राध्यतां स्वाहा
वायो व्रतपते आदित्य व्रतपते व्रतानां व्रतपते
सावित्रं व्रतञ्चरिष्यामि तच्छकेयन्तन्मे राध्यताम्
स्वाहेत्यथापरेणाग्निमुदगग्रं कूर्चन्निधाय तस्मिन्
प्राङ्मुख आचार्य उपविशति राष्ट्रभृदस्याचा
र्यसन्दी मा त्वद्योषमिति तस्याग्रेण कुमारो दर्भेषु

प्रासङ्मुख उपविश्य पादावन्वारभ्याह सावित्रीम्
भो अनुब्रूहीति तस्मा अन्वाहोमिति प्रतिपद्यते
तत्सवितुर्वरेण्यमित्येतां पच्छोऽर्धर्चशस्तत स्सम
स्तां व्यस्तां व्याहृतीर्विकृताः पदादिष्वन्तेषु वा तथा
र्धर्चयोरुत्तमां कृत्स्नायामित्यथ कुमारः पक्वादुपा
दाय प्राश्नाति शरीरम्मे विचर्षणं जिह्वा मे मधुमत्त
मा कर्णाभ्यां भूरि विश्रुवम् ब्रह्मणः कोशोसि मेधया
पिहितः श्रुतम्मे गोपायेत्यथ हैके प्राक्सावित्र्याः प्रा
श्नाति ब्रह्म वा अन्नमिति वदन्तस्तदु तथा न कुर्यान्ना
नुक्तायां सावित्र्यां प्राश्नीयादित्यनूक्तायाम सावि
त्र्यां प्राश्नीयादिति शाकटायनकमथाप उपस्पृश्य
ज्योतिष्मत्यादित्यमुपतिष्ठत उद्वयन्तमसस्परीत्यथै
नं संशास्ति ब्रह्मचार्यस्यपोशान कर्म कुरु मा दिवा सु
षुप्था स्समिध आधेहि भैक्षाचर्यञ्चर सदारण्यात्समि
ध आहरोदकुम्भञ्चाचार्याधीनो [illegible]द मधीष्वेति स
एवमेवैतत् सर्वं करोत्यथास्मा अरिक्तम्पात्रं प्रयच्छ
न्नाह मातरमेवाग्रे भिक्षस्वेति समानरमेवाग्रे भिक्ष
ते भवति भिक्षान्देहीति ब्राह्मणो भिक्षेत भिक्षां
भवति देहीति राजन्यो देहि भिक्षां भवतीति वैश्यः
तत्समाहृत्योपनिधायाचार्यायाह भैक्षमिदमिति

तत् सुश्रोक्ष्यमितीतरः प्रतिगृह्यास्युत्तरेणाग्निन्दे
स्त्रीप्रतिकृतीं कृत्य गन्धैर्माल्येन चालंकृत्य त्रिवृतान्नेन
ब्राह्मणान् सम्पूज्याशिषो वाचयित्वा श्रद्धामेधे प्रये
तामिति त्र्यहमेतमग्निन्धारयन्ति क्षारलवणवर्ज
मधश्शय्याचैतस्मिन्नेवाग्नौ व्याहृतीभिस्सायंप्रातस्स
मिधोभ्यादध्यात् देवमन्यस्मिन्नपि सदाथैनम्प्रदक्षि
णमग्निम्परिसमूहति· जुषस्वरस्समिधमग्ने। अ
द्यशोचा ब्रहद्यजतन्धूममृण्वन् उपस्पृश दिव्यं सा
नस्तूपैस्सं रश्मिभिस्ततनस्सूर्यस्येत्यथैनं प्रदक्षिण
मग्निम्परिषिञ्चत्यदितेनुमन्यस्वेति दक्षिणतः प्रा
चीनमनुमतेनुमन्यस्वेति पश्चादुदीचीनँ सरस्व
तेनुमन्यस्वेत्युत्तरतः प्राचीनन्देवसवितः प्रसुवेति
समन्तम्प्रदक्षिणं समन्तमेव वा तूष्णीन्तस्मिन् व्या
हृतीभिस्सायम्प्रातस्समिधो भ्यादध्याति भूस्वाहा
भुवस्स्वाहा सुवःस्वाहा भूर्भुवस्सुवःस्वाहेति तथैव
परिसमूह्य तथैवपरिषिञ्चत्यन्वमंस्थाः प्रासावी
रिति मन्त्रान्तान् सन्नमयत्यथैनमुपतिष्ठते यत्ते
अग्ने तेज इति त्रिभिःपर्यायैर्मयिमेधाम्मयिप्रजा
मिति त्रिभिः षोढाविहितो वै पुरुष इत्येतस्मात्
ब्राह्मणादयमिसुषु व्युष्टास्वेतमग्निमादधायतां

दिशं यन्ति यत्रास्य पलाशः स्पष्टो भवति तं प्रदक्षि
णम्परिसमूहति सुश्रवस्सुश्रवसम्माकुरु यथा
त्वं सुश्रवस्सुश्रवा अस्येव महं सुश्रवस्सुश्रवा भूया
सं यथा त्वं सुश्रवो देवानां निधिगोपोस्येव महं ब्राह्म
णानां ब्रह्मणो निधिगोपो भूयासमिति तस्याग्रे
ण चोत्तरेण वाग्निमुपसमाधाय सम्परिस्तीर्याथा
वृत्य प्रायश्चित्ते जुहोति यन्म आत्मनो मिन्दाभूद
ग्निस्तत्पुनराहा पुनरग्निश्चक्षुरधादिति द्वाभ्या
म्पलाशी चतस्र स्समिध आर्द्रास्सपलाशास्सप्रा
रोहाः प्रादेशमात्रीरप्रतिशुष्काग्रा घृताक्ता
अभ्याधापयन्वाचयति याज्ञिकानां वा वृक्षाणां
अन्यतमस्याग्ने व्रतपते सावित्रं व्रतमचारिषन्त
च्छकेयन्तन्मे राधि स्वाहा वायो व्रतपते आदित्य व्रत
पते व्रतानां व्रतपते सावित्रं व्रतमचारिषन्सदश
कन्तन्मे राधि स्वाहेति तथैव सुश्रव समभ्यर्च्य त्रि
वृतान्नेन ब्राह्मणान् संपूज्याशिषो वाचयित्वा सुश्र
वाः प्रियनामित्सत्रैके दण्डमजिनम्मेखलां वास
श्चाति सृजन्त्यन्यानादायाथास्य वास आधत्ते यस्यै
प्रथमं वास्य वहराम स्तन्त्वा विश्वे अनुमदन्तु देवाः तन्त्वा
भ्रातरस्सुवृदो वर्धमानमनुजायन्ता बहवस्सुजातमिति

योनाभ्युपरि जान्वाच्छाद्या दण्डमजिनमेखला
श्चधारयन् श्राद्धसूतकमैथुनमधुमांसानि च
वर्जयन् भैक्षाहारो धश्शाद्य चार्यस्य गृहानेती
ति विज्ञायत आचार्यो वै ब्रह्मेति ॥ २–८ ॥ पञ्चमः ॥
वेदमधीत्य स्नास्यन्निति सूत्रं (अस्य समावर्तनसू
त्रस्य नात्र पाठः किन्तु अन्यत्र पठितं अत्र संगृह्य
लिखितम् अत्रोपयोगात्) वेदमधीत्य स्नास्यन्नुपक
ल्पयत एकाच्चोपबर्हणञ्च नापितञ्च क्षुरञ्च
दारूणि चोपस्तरणञ्च वृकलांश्च दन्तधावनमु
ष्णाश्चापः परिशीताश्च सार्वसुरभिपिष्टञ्चाञ्जनञ्चा
दर्शञ्चाहतञ्च वासः प्रावरणञ्च वसनान्तरं बादर
म्मणिसुवर्णोपधानं सूत्रञ्च प्रवृतौ च दण्डञ्चोपा
नहौ च छत्रमानडुहञ्चर्म सर्वरोहितमित्येतेस्य
संभारा उपक्लृप्ता भवन्ति स्नानस्य मीमांसा रोहिण्यां
स्नायादित्येकं प्राजापत्यं वा एतन्नक्षत्रं तद्दन्तस्य
प्राजापत्य एव नक्षत्रे स्नातं भवत्यथो सर्वान्रोहान्
रोहतीति तिष्ये स्नायादित्येकं बार्हस्पत्यं वा एतन्नक्ष
त्रन्तद्दन्तस्य बार्हस्पत्य एव नक्षत्रे स्नातं भवत्यथो ब्र
हस्पतिप्रसूतो सानीत्युत्तरयोः फल्गुन्योः स्नायादि
त्येकं भाग्यं वा एतन्नक्षत्रन्तद्दन्तस्य भाग्य एव नक्षत्रे

स्नातं भवत्यथो भाग्योसानीति हस्ते स्नायादित्येकं
सावित्रं वा एतन्नक्षत्रन्तदनास्य सावित्र एव न
क्षत्रे स्नातं भवत्यथो सवितृप्रसूतोसानीति चि
त्रायां स्नायादित्येकमैन्द्रं वा एतन्नक्षत्रन्तदस्यै
न्द्र एव नक्षत्रे स्नातं भवत्यथो चित्रोसानीति वि
शाखयो स्नायादित्येकमैन्द्राग्नं वा एतन्नक्षत्र
न्तदस्यैन्द्राग्न एव नक्षत्रे स्नातं भवत्यथो विशा
खोसानीति प्रजापशुभिरित्येकेवामेतस्मिन्ना
पूर्यमाणपक्षे पुरादित्यस्योदयाद्व्रजमभिप्रप
द्यतेनैनमेतदहरादित्योभितपेन्मध्यन्दिनङ्क
दहश्च स्नातानां मुखं तप एतत्तेजसा यशसा
तपसन्तर्लोम्नाचर्मणा व्रजमभिनिघ्नन्ति पूर्वार्ध
मध्ये व्रजस्याग्निमुपसमाधाय संपरिस्तीर्याहर
न्त्येतान् संभारान् सकृदेव संभरति यत्सह
सर्वाणि मानुषाणि इत्येतस्माद्ब्राह्मणाद्दर्भेषु
दक्षिणतो ब्राह्मणमुपवेशयत्युत्तरत उदपा
त्रं पालाशीश्च समिधोग्निं दधात्यपरेणाग्नि
मुदीचीनप्रतिविवर्णामेरकां साधीवासामा
स्तीर्य तस्यां प्राङ्मुख उपविशत्युत्तरतो नापि
त उत्तरत उपबर्हणमामध्यन्दिनं भिक्षान्दद्या

दपिहगाँ पचेद्ध्माश्चेदस्य स्यादत्रैताँ पाला
शीः समिधमाज्येनाक्ता मध्यन्दिनेभ्यो दधा
ति ॥ इमँ स्तोममर्हते जातवेदसे रथमिह सम्म
हेमा मनीषया । भद्रा हि नः प्रमतिरस्य सँसद्यग्ने
सख्ये मा रिषामा वयन्तव स्वाहेत्यथैरकायाउ
दीचीनशिरा निपद्यते — त्र्यायुषं जमदग्नेः क
श्यपस्य त्र्यायुषमगस्त्यस्य त्र्यायुषमृषीणाम्
त्र्यायुषं यद्देवानां त्र्यायुषन्तन्मे अस्तु त्र्यायुष
मित्युद्यमानमनुमन्त्रयते । शिवा मे भवथ संस्पृ
शेति क्षुरमभिमन्त्रयते । क्षुरो नामासि स्वधिति
स्ते पिता नमस्ते अस्तु मा मा हिंसीरित्युपमान
मनुमन्त्रयते । यत् क्षुरेण वर्चयसि वप्ताव
पसि केशश्मश्रु - वर्चया मे मुखम्मा न आयुः
प्रमोषीरिति श्मश्रूण्येवाग्रे वपतेऽथोपपक्षाव
थ केशान्यथोपपादमितराण्यङ्गान्येतस्मा
द्ध्येषा - जरसा पूर्वं आयुषि अन्नादा भवन्ति
य एवं विद्वाँसो लोमानि वापयन्ते स यदि
लोमानि वापयिष्यमाण स्यात् केशश्मश्रु वाप
यित्वा लोमानि संहृत्य नखानि निकृन्तयीता
थैतानि समुच्छिद्य ब्रह्मचारिणे प्रयच्छन्नाहे

मानि हृत्वा दर्भस्तम्बे वोदुम्बरमूले वा निधत्तादि
ति तानि स तत्र निदधात्यपरेणाग्निं प्राङ्मुख उप
विश्य मेखलां विस्रंसयत इमं विष्यामि वरुणस्य
पाशमिति योऽस्य तत्रारातेः पुत्रो वान्तेवासी वा भवति
तस्मै प्रयच्छन्नाहेमां हृत्वा न्यग्रोधे वोदुम्बरमूले वा
निधत्तादिति तां स तत्र निदधातीममहममुष्यामुष्या
यस्य शाचापाप्मानमपगूहाद्युत्तरस्य द्विषद्भ्य इति
वृकलैः प्रधाप्य दन्तान्विधापयतेन्नाद्याय व्यूह
ध्वं भगो राजायमागमत् - स मे मुखम्प्रसर्पतु वच
से च भगाय चेत्युभयोरपस्सन्निषिञ्चत्युष्णासुशी
ता आनयति दैवमानुषस्य च व्यावृत्या इति तासा
मञ्जलिनोपहत्याभिषिञ्चत्यापो हि ष्ठा मयो भुव इति स
भि हिरण्यवर्णाः शुचयः पावका इति तिसृभि
बोदा विहिष्टो विहितो हैव पुरुष इत्येतस्मात् ब्रा
ह्लाद थैतस्य सर्वं सुरभि पिष्टं समुदायुत्य त्रिः प्रसि
ञ्चति ॥ — ॥ नमश्शाकजञ्जभाभ्यान्नमस्ताभ्यो देव
ताभ्यो या अभिग्राहिणीरित्यनुलिम्पेत्यदप्सरासु
च यो गन्धो गन्धर्वेषु च यद्यशः दिव्यो यो मानुषो
गन्धस्स मा माविशतादित्यहतं वासः परिधत्तो
स्वामाता नूराविशाशिवो माता नूराविशेत्येवमेव

उत्तरासंग्यमेवमेवात ऊर्ध्वमथैतम्बादरम्मणिं
सुवर्णोपधानं सूत्रे प्रोध्य दर्व्यामाधाय दर्वीदण्डे
सूत्रेण पर्यस्य जुहोति यमोबध्ये त्रायमाणा सह
माना सहस्वती सा मा करोतु सोमवर्चसँ सू
र्यवर्चसं ब्रह्मवर्चसिँ सुवीर्यँ रायस्पोषमौद्भिदं
नम्मान्नादं करोतु स्वाहेत्यथैनमुदपात्रेण परि
प्लावयति विश्वा उत त्वया वयन्धारा उदन्या
इव अतिगाहेमहि द्विष इत्यपाशोसि सुकाक्ष्ण
या परिहरति वध्यँहि प्रत्यञ्चम्प्रतिमुञ्चति व्याव
त्या इत्येतस्मात् ब्राह्मणादथैनौ प्रवर्तौ सूत्रे प्रोत्य
दर्व्यामाधाय दर्वीदण्डे सूत्रेण पर्यस्य जुहो
त्यायुष्यं वर्चस्यँ सुवीर्यँ रायस्पोषमौद्भिदम्
इदँहिरण्यं वर्चसे जैत्रायाविशतादिमँ रयिः स्वा
हेति द्वितीयां जुहोति शुनीमिवाहँ हिरण्यस्य
पितुरिव नामाग्रृहीक्ष्मम् मग्राहं तन्मा करोतु
सोमवर्चसं सूर्यवर्चसं ब्रह्मवर्चसिनमान्नादं
करोतु स्वाहेति तृतीयां जुहोत्युच्चैर्वाजि पृतना
सहँ सभासाहन्धनंजयं सर्वास्समृद्धिरृद्धयो
हिरण्येया स्समाहिता स्वाहेति चतुर्थीं जुहोति
विराजञ्च स्वराजञ्चाभिष्टीर्या च मो गृहे लक्ष्मी

राष्ट्रस्य या मुखे तया मा सँ सृजामसि स्वाहेति
पञ्चमीं प्रजुहोति यशो मा कुरु ब्राह्मणेषु यशो राज
सु मा कुरु यशो विश्येषु शूद्रेष्वहमस्मि यशस्त
पस्वा हेत्यथैतावुदपात्रेण परिप्लावयति विश्वा
उत त्वा वयमित्येतया तयोरन्यतरमादाय दक्षिणे
कर्ण आबध्नात्यायुष्यं वर्चस्यमित्येताभिः पञ्च
भिरथैनमनुपरिवर्तयत्यृतुभिस्त्वार्तवैः स्संव
त्सरस्य यापसा ते स्वासहानुकरोमि इत्येवमेवो
त्तरं प्रवर्तमाबध्नीतेथ स्रजम्प्रतिमुञ्चते ॥ ३०॥
शुभिके शिर आरोह शोभयन्ती मुखम्मम। मुखँ
हि मम शोभय भूयाँसञ्च भगँ कुरु। यान्त्वा जहारज
मदग्निः श्रद्धायै कामायान्ये। तान्वे मां प्रतिमुञ्चतु
वर्चसे च भगाय चेत्यत्रैके त्रैककुदेनाञ्जनेनाङ्क्ते।
दयादाञ्जनं त्रैककुदं जातँ हिमवत उपरि। तेन
वामाञ्जे मयि पर्वतवर्चसमस्त्वित्यादर्शे परिपश्य
ते यन्मे मनः परागतमादर्शे परिपश्यतः। इदं तन्
मयि पश्याम्यायुष्यं वर्चस्यम्मे अस्त्वित्यथोपान
हावुपमुञ्चते द्यौरसीति दक्षिणे पादे प्रथिव्य
सीति उत्तरेऽथ दण्डमादत्ते सखा मा गोपायेत्य
थच्छत्रमादत्ते दिव्योसि सुपर्णोन्तरिक्षान्मा पाहि

ति सोत्रैवास्त आनक्षत्राणामुदयादुदि
तेषु नक्षत्रेषूपनिष्क्रम्य दिश उपतिष्ठते देवीष्ष
डुर्वीरुरु णः कृणोत विश्वे देवास इह वीरयध्वमिति
मा हास्महि प्रजया मा तनूभिरिति नक्षत्राणि
मा रथाम द्विषते सोमराजन्निति चन्द्रमसम्
समुपस्थाय यत्र यत्र कामयते तत्तदेति से
तत् समावर्तनम् ॥ ७ ॥ तूष्णीं समावर्तनम् ॥ ७
अथेतरत्तूष्णीमेव तीर्थे स्नात्वोदेत्याथ यदि रथं
लभेत रथन्तरमसीति दक्षिणं चक्रमभिमृश
ति बृहदसीत्युत्तरं वामदेव्यमसीति मध्यमथ
रथं प्रवर्तमानमनुमन्त्रयते यं वामश्विनो
रथो मा दुःखे मा सुशेनिव दिस्य यदि शमरथं
करिष्यन् भवत्य उपस्पृश्येमामभिमृशतीह
धृतिरिह विधृतिरिहान्तिरिह रमतिरिह रम
स्वामित्यथास्मा अन्यदाहारयति तत्प्रतिगृ
ह्णात्याम आगाद्वर्चसा यशसा संसृज पयसा
तेजसा च तं मा प्रियं प्रजानां कुर्वधिपतिं प
शूनामिति ब्राह्मणः प्रियः पशूनां कुर्वधिप
तिः प्रजानामिति राजन्यस्तदुपस्पृश्य प्राक्
सकृत्वा इसाह मधुपर्कं प्रोक्तमभिमन्त्रयते·

समावर्तु समापातु समाजुषतामिसुभाभ्यां
हस्ताभ्यां प्रतिगृह्णामि सामं आगँवर्चसासँसृज
प्रियः प्रजानामधिपतिः पशूनामिति प्रियंप
शूनां कुर्वधिपतिः प्रजानामिति राजन्यस्तस्मिंश्चि
त् किंचिदापतितं स्याच्चाङ्गुष्ठेन च महानाम्न्या
चोपसंगृह्येमान्दिशान्निरस्यति नेशानिद्धिः
कन्याभियाते घोरा तनूस्तया तमाशयो स्मान्द्वेष्टि
यञ्च वयं द्विष्मइस थापउपस्पृश्य समुदायुस
त्रिः प्राश्नाति प्राण इदनो बलन्ददामीष्टम्पशू
नामधिपतिं कुर्विति द्वितीयः त्रिः पीतोच्छिष्टन्द
दाति यमात्मनः सोमोसि सोमपम्माकुर्विति द्वि
तीयमन्नमस्यान्नादम्माकुर्विति तृतीयः त्रिः पी
तोच्छिष्टन्ददाति यमात्मनः श्रेयांसमिच्छेत्तस्मै
शेषन्दद्यादुपनीतां गामनुमन्त्रयते जहिमेपा
प्मानमुपवेत्तुश्चेति तांकुर्वन्तिवोत्सृजन्तिवा
सयदि करिष्यन् भवतकुरुतेत्याहाथयद्युत
सक्ष्यन् भवति तामनुमन्त्रयते गौर्धेनुभव्या
मातारुद्राणान्दुहिता वसूनां स्वसादित्यानाम
मृतस्यनाभिः प्रणुवोचञ्चिकितुषे जनाय
मागामनामदितिं वधिष्ट पिबतूदकन्तृणान्यत्तु

ओमुत्सृजते यस्मा ओदनमाहारयति तम
श्नाति ब्रह्मवान् ब्रह्मवाश्नातीति चतुष्टयो द्धयो
दधिमधुघृतमाप इति पश्चतय इत्येके दधि
पयो मधुघृतमाप इति॥

] Both. begins

समावर्तनमन्त्रब्राह्मणं वेद इत्याचक्षते म
न्त्रब्राह्मणयोर्वेदनामधेयम्मन्त्रब्राह्मणे यज्ञ
स्य प्रमाणमधीत्य मन्त्रब्राह्मणे चीर्णे बुवाव्रते वे
ना वदेव नानाथ देवयजनोल्लेखन प्रभृत्याग्नि
मुखात् कृत्वा पालाशीं समिधमाज्येनाक्तामध्य
न्दिनेऽभ्यादधातीति तत् पुरस्तात् व्याख्यातमथ
केशश्मश्रुलोमनखवापनेनैव प्रतिपद्यते सि
द्धमाच्छत्रादानात् कृत्वा पक्वाज्जुहोत्यावहन्ती
वितन्वाना कुर्वाणा चीरमात्मनः वासाँसि मम
गावश्च अन्नपाने च सर्वदा ततो मे श्रियमा
वह लोमशाम्पशुभिस्सह स्वाहेत्यथाज्याहुती
रुपजुहोत्यामायन्तु ब्रह्मचारिणः स्वाहा यशो
जने सानि स्वाहा श्रेयान्वस्यसो सानि स्वाहा
तन्त्वा भग प्रविशानि स्वाहा स मा भग प्रविश
स्वाहेति स्विष्टकृत्प्रभृति सिद्धमाधेनुवरप्रदाना
द्दर्भाग्रेणाग्नि बिल्वशाखायां हुतशेषं निदधाति

तस्मात्सहस्रशाखे निभगाहन्नपिमृज्ने स्वाहेस
थपक्का दुपादाय प्राश्नाति यथापः प्रयता
यन्ति यथामासा अहर्जरम् एवमां ब्रह्मचा
रिणः धातरायन्तु सर्वत स्स्वाहेति प्राश्याप
आचम्य जठरमभिमृशति प्रतिवेशोऽसि
प्रमाभाहि प्रमापद्यस्वेति सौत्रे वास्त आन
क्षत्राणामुदयादयोदिते पुनक्षत्रे वूपनिष्क्र
म्य दिश उपतिष्ठत इति सिद्धमत ऊर्ध्वम् ॥ २ – ४ ॥
यस्मिन्नग्नावुपनयति तस्मिन् ब्रह्मचर्यं तस्मि
न्व्रतचर्या तस्मिन् समावर्तनं तस्मिन् पाणि
ग्रहणं तस्मिन् गृह्याणि कर्माणि क्रियन्ते तस्मिन्
काम्यानि तस्मिन् प्रजासंस्कारा इत्येके। स एष
उपनयनप्रभृति व्याहृतीभिः समिद्भिर्हूयत
आसमावर्तनात्समावर्तनप्रभृत्याज्यैर्व्याहृ
तिभिरेव हूयत आपाणिग्रहणात् पाणिग्रहण
प्रभृति व्रीहिभिर्यवैर्वा हस्तेनैतेन आहुतीर्जु
होत्यग्नये स्वाहा प्रजापतये स्वाहेति सायं सू
र्याय स्वाहा प्रजापतये स्वाहेति प्रातरप्यग्नि
होत्रदेविवामन्यतमेन जुहुयात् पर्वणि पर्वणि
चाग्नेय स्थालीपाकस्स एष आघारावाज्यस्य।

दाग्निहोत्रिको वाप्यापूर्तिको वा तेन सर्पिष्म
ता विधावन्तं ब्राह्मणं भोजयेद्यो स्यापचित
स्तस्मा ऋषभन्ददातीत्येके तस्यानुगतस्य वा
प्रकृतिस्तत आरभणमुपवासश्चानुततेन्यत
रस्य भार्यायाः पत्युर्वानुगतिपित्र्येकास्नुहुया
दयाश्चाग्नेसीनभिशस्तीश्च सत्यमित्वमया अ
सि· अयसा मनसा धृतोयसा हव्यमूहिषे अ
या नो धेहि भेषजँ स्वाहेत्याहुतो व्याख्यातः॥षष्ठः॥
अथ शूलगवस्संवत्सरे संवत्सरे मार्गशीर्ष्यां
पौर्णमास्यां क्रियेतापि वार्द्रायां गोषु गोषु तवो
पतप्तासु गुप्तास्वरण्येग्निमुपसमाधाय सम्प
रिस्तीर्य प्रणीताभ्यः कृत्वा बर्हिरारादाय गामु
पाकरोतीशानाय त्वाजुष्टं प्रोक्षामीति तूष्णीमि
त्येके थैनमद्भिः प्रोक्षतीशानाय त्वाजुष्टं प्रोक्षामी
ति तूष्णीमित्येके तामत्रैव प्रतीचीनशिरसीमुदी
चीनपदीं संज्ञापयन्ती तस्यैवसंज्ञप्तायां अद्भि
रभिषेकमप्राणानाप्याययति तूष्णीन्तूष्णीं वपा
मुत्खिद्य हृदयमुद्धरति प्रज्ञातानि चावदानानि
तान्येतेष्वेव शूलेषु पनीष्यैतस्यान्ते वाग्नौ
श्रपयन्त्यथैतानि प्रतिष्ठितान्यभिघारयन्ति

परिधानप्रभृत्याग्निमुखात् कृत्वा दैवतमावाहस्था
त्वावहन्नु शूलेषूपनिक्षिप्य पुनः कुंभ्यां श्रपयन्स
थैतान्यभिघारितानुद्वास्य प्रतिष्ठितान्यभिघार
यति परिधानप्रभृत्याग्निमुखात् कृत्वा दैवतमावा
हयत्या त्वा वहन्नु हरयस्सचेतस इषेवैते रइवैस्स
हकेतुमद्भिः वाताजितैर्बलवद्भिर्मनोजवेश्याया
हि शीघ्रम्मम हव्याय शर्वोमित्यथ स्रुवेणोपस्ती
र्णाभिघारितां वपां जुहोति सहस्राणि सहस्र
श इति पुरोनुवाक्यामनूच्येशानन्त्वा भुवना
नामभिश्रियमिति याज्यया जुहोत्यथैतान्यवदा
नानीडसूने प्रच्छिद्यौदनम्मांसं यूषमित्यान्येन
समुदायुत्य भेक्षणेनोपघातं पूर्वार्धे जुहोति॥२५॥
भवाय देवाय स्वाहा शर्वाय देवाय स्वाहेशानाय
देवाय स्वाहा पशुपतये देवाय स्वाहा रुद्राय
देवाय स्वाहोग्राय देवाय स्वाहा भीमाय देवाय
स्वाहा महते देवाय स्वाहेत्यथ मध्ये जुहोति
भवस्य देवस्य पत्न्यै स्वाहा महतो देवस्य सुता
य स्वाहेत्याज्याहुती रुपजुहोति नमस्ते रुद्र
मन्यव इत्यन्तादनुवाकस्य स्विष्टकृत्प्रभृति
सिद्धमाधेनुवरप्रदानाद् याग्रेणाग्निमर्कपर्णे

षुहुतश्चैवं निदधाति यो रुद्रो अग्नौ यो अप्सु
य ओषधीषु यो रुद्रो विश्वा भुवनाविवेश तस्मै
रुद्राय नमो अस्त्वित्यथ स्थालीं सुक्षाल्य नमाज्यशे
षमुदकशेषञ्च पात्र्यां समानीय वेतसशाखायां
वोक्षन् सर्वतस्त्रिः प्रदक्षिणं गाः पर्येत्या गावो अ
ग्मन्नुत भद्रमक्रन्नित्येतेन सूक्तेन महत्स्वस्त्यय
नमित्याचक्षते यद्यदि गान्नलभते मेषमजं वा
लत ऐशानाय स्थालीपाकं वा श्रपयन्ति तस्मा
देतत् सर्वं करोति यत् गवा कार्यं शूलगवो
व्याख्यात एवमेवापरपक्षस्याष्टम्यां प्रदोषे
क्रियेतैतावदेव नानानात्रोपाकरणम्पशोः ॥ १० ॥
षष्ठः ॥ अथ बलिहरणं सायम्प्रातर्यदशनीयस्य
क्रियते औपासने पचने वा होम एतावदेव ना
नाक्षारलवणवरान्नसंसृष्टस्य तु होमं परिचक्षते
काममितरेष्वायतनेष्वथ यद्येतदेवस्यादुत्तरतो
भस्ममिश्रानङ्गारान्निरूह्य तेषु जुहुयात् सर्वे
ष्वायतनेषु पाणिना परिसमूह्योभयतः परि
षेकन्निदध्याद्देशाभ्यासे मन्त्राभ्यासः कामं
समानस्थानेष्ववगाहश्शाहस्तेन होमो शयेस्वा
हा सोमाय स्वाहा ध्रुवाय स्वाहा ध्रुवाय भौमाय

स्वाहा ध्रुवक्षितये स्वाहा च्युतक्षितये स्वाहेशा
नाय स्वाहा जयन्ताय स्वाहा धर्मरुचये स्वाहा
धान्वन्तरये स्वाहा विद्यायै स्वाहाम्बिकायै स्वाहा
हरये स्वाहा गणेभ्यः स्वाहा गणपतिभ्यः स्वाहा
परिषद्भ्यः स्वाहा विश्वेभ्यः स्वाहा देवेभ्यः स्वाहा
साध्येभ्यो देवेभ्यस्स्वाहा सर्वेभ्यो देवेभ्यस्स्वा
हा सर्वाभ्यो देवताभ्यस्स्वाहा भूस्स्वाहा भुवस्स्वा
हा सुवस्स्वाहा भूर्भुवस्सुवस्स्वाहाग्नये स्विष्ट
कृते स्वाहेत्युत्तरार्धपूर्वार्धे परेणाग्निं धर्माय
स्वाहा धर्माय स्वाहेत्यग्रेणाग्निं कद्रुपे नाग
मात्रे स्वाहा सर्वेभ्यस्स्वाहेति अब्भ्यो अवका
शचतायै देव्यै स्वाहा वास्तुपाल्यै सगणायै
स्वाहेत्यश्मण देशेभ्य स्वाहा वरुणाय स्वाहेति स्था
ल्यां प्रजापतये स्वाहा परमेष्ठिने स्वाहेति देव
तावकाशे ऋषभाय स्वाहा रुद्राय स्वाहा रुद्रा
ण्यै स्वाहेति मध्येगारस्यौषधिवनस्पतिभ्यः
स्वाहा रक्षोदेवजनेभ्यः स्वाहेत्युच्छिरसि का
माय स्वाहा भगाय स्वाहा श्रियै स्वाहा विष्ण
वे स्वाहेति स्थूणादेशे गृहाय स्वाहा गृहशा
नाय स्वाहेति धनधान्यावकाशे धनधान्या

भ्यः स्वाहा वैश्रवणाय स्वाहेति गोष्ठे वा पत्न्यै
वाश्रियै स्वाहा पुष्ट्यै स्वाहेत्युलूखलमुसला
वकाश उलूखलमुसलाभ्यां स्वाहेति दृ
षदुपलावकाशे दृषदुपलाभ्यां स्वाहेति स
मूहन्या अवकाशे समूहन्यै देव्यै स्वाहेत्युत्त
रपूर्वदेशे गारस्य गृह्याभ्य स्वाहा वसानेभ्य
स्वाहा वसानपतिभ्य स्वाहा सर्वदेवजनेभ्यः
स्वाहा सर्वभूतेभ्य स्वाहेति द्वारमध्येन्तरिक्षा
य स्वाहा वान्तरिक्षाय स्वाहेति पार्श्वयो धात्रे
स्वाहा विधात्रे स्वाहेत्युपपार्श्वयो भूत्यै स्वाहा प्र
भूत्यै स्वाहेति संवरणदेशे यदजति जगति यच्च
चेष्टति नाम्नो भागोयं नाम्ने स्वाहेत्यथोपनिष्क्र
म्य ज्येष्ठावकाशे ज्येष्ठाभ्यां स्वाहा करस्कराभ्यां
स्वाहेत्यनसि वा रथे वाश्रियै स्वाहा विष्णवे स्वाहे
ति गोष्ठे रुद्राय स्वाहा पशुभ्य स्वाहा पशुपतये
स्वाहेति वास्तुमध्ये वास्तोष्पतये स्वाहा पृथिव्यै
स्वाहान्तरिक्षाय स्वाहा सूर्याय स्वाहा चन्द्रमसे
स्वाहा नक्षत्रेभ्य स्वाहाद्भ्य स्वाहौषधीभ्यः स्वा
हा वनस्पतिभ्य स्वाहा चराचरेभ्य स्वाहा परिप्ल
वेभ्य स्वाहा सरीसृपेभ्य स्वाहा देशेभ्य स्वाहा

कालेभ्यस्स्वाहा लोकेभ्यस्स्वाहा वेदेभ्यस्वा
हर्षिभ्यस्स्वाहा वसुभ्यस्स्वाहा रुद्रेभ्यस्स्वाहा
दित्येभ्यस्स्वाहेन्द्रायस्वाहा बृहस्पतये स्वाहा
प्रजापतये स्वाहा ब्रह्मणे स्वाहेत्यथ दक्षिणतः
प्राचीनावीति पितृभ्यः स्वधा नमस्स्वाहा पिता
महेभ्यस्स्वधा नमस्स्वाहा प्रपितामहेभ्यस्स्वधा
नमस्स्वाहेत्यथापउपस्पृश्योत्तरतो यज्ञोपवी
ति नमो रुद्राय भगवते स्वाहेत्यथ दिक्षु प्रा
च्यै दिशे स्वाहा दक्षिणायै दिशे स्वाहा प्रतीच्यै
दिशे स्वाहा उदीच्यै दिशे स्वाहोर्ध्वायै दिशे
स्वाहा धरायै दिशे स्वाहेत्यथान्तरदिक्ष
यमायस्वाहा निर्ऋत्यै स्वाहा रक्षोभ्यस्स्वा
हेशानायस्वाहेत्यथाकाश उत्क्षिपति ये भूताः
प्रचरन्ति वा बलिमिच्छन्तो वितस्य प्रेष्याः तेभ्यो ब
लिं पुष्टिकामो हरामि मयि पुष्टिं पुष्टिपतिर्दधातु
स्वाहेति दिवा ये भूताः प्रचरन्ति नक्तं बलिमिच्छ
न्तो वितस्य प्रेष्याः तेभ्यो बलिं पुष्टिकामो हरामि
मयि पुष्टिं पुष्टिपतिर्दधातु स्वाहेति नक्तं संक्षा
लनं प्रागुदीच्यां दिशि निरयति नमो रुद्राय
सौमाय स्वाहेति ॥१०॥ अथ वैश्वदेवं हुत्वा

तिथिमाकांक्षेदा गोदोंह कालमंगं वोद्धस्य इत्यादि
ज्ञायते यज्ञोवा एष पञ्चमो यदतिथिर्जघनेन गा
र्हपत्यमुपविश्यौपासनस्याधीहि भो इति गार्ह
पत्यमुक्त्वा प्राणायामैस्त्रिराचम्य सावित्रीं सहस्र
कृत्व आवर्तयेच्छतकृत्वो परिमितकृत्वो वा दशा
वरं वेदादयश्छन्दांसि कूश्माण्डानि चाधीयीता
ग्निमीडे पुरोहितमित्यृग्वेदस्येषे त्वोर्जे त्वेति यजु
र्वेदस्याग्न आयाहि वीतय इति सामवेदस्य श
न्नो देवीरभिष्टय इत्यथर्ववेदस्याग्निर्मूर्धा दिवः
इति छन्दांसि यद्देवा देवहेडनमिति कूश्माण्डानय
दधीते स ब्रह्मयज्ञो यज्जुहोति स देवयज्ञो यत्
पितृभ्यः स्वधा करोति स पितृयज्ञो यत् भूते
भ्यो बलिं हरति स भूतयज्ञो यत् ब्राह्मणेभ्योन्न
न्ददाति स मनुष्ययज्ञ इत्येते पञ्चमहायज्ञास्स
ततिसुप्रयुक्ता नयन्ति परमां गतिम्. एतेभ्यो
यस्य पञ्चभ्यो यज्ञ एको विहीयते - नमस्कृत्या
हुतिस्तत्र प्रायश्चित्तं विधीयते. अहं त्र्यहं वापि
प्रमादात्कृतेषु तिस्रस्तन्तुमती हुत्वा चतस्रो वारु
णीर्जपेत् दशाहं द्वादशाहं वा विच्छिन्नेषु सर्वे
षु: चतस्रोऽभ्यावर्तिनीर्हुत्वा अप्स्वान्तमतश्च

रुः यस्य स्त्रीवानपेतोवा गृहेष्वेतान्नलीन्हरेत्।
कूस्माण्डयस्तत्र होतव्या हुत्वा यज्ञसमृद्धयः प्रवासं
गच्छतो यस्य गृहे कर्तानविद्यते पश्चानामप्रहताये
षांसयज्ञेस्सहगच्छति प्रवासे कुरुते चैनान्यदन्नमु
पपद्यते नचेदुत्पद्यते चान्नमद्भिरेनान्समापयेत्।
अद्भिरेवव्रतं कुर्याद्यथालाभमनुव्रतम् देवानां देव
यज्ञेन (ब्रह्मयज्ञेन ब्रह्मणः) द्विजागच्छन्ति साम्यताम्।
पितॄणाम्पितृयज्ञेन भूतयज्ञेन भूतिनाम्। मनोर्मनु
ष्ययज्ञेन ब्रह्मयज्ञे ब्रह्मणः एतासां साम्यतां गत्वादे
वतानां शतं समाः आनन्दम्ब्रह्मगच्छन्ति ध्रुवं शाश्व
तमव्ययमिस्त्यास्यातिथिर्भवति गुरोस्समानवृत्तिर्वै
चानसोगतश्री स्नातको राजावा धर्मयुक्तस्तेषांमभ्यु
त्थायासनं पाद्यमर्हणमर्घ्यंवा प्रयुञ्जीत यास्तत्रौव
धयस्सन्ति तादेया अन्यांवा प्रक्रियां प्रकुर्वीत सर्वे
भ्योभ्यागते आश्वचाण्डालेभ्यस्स्वागतं कार्यमोषधि
विभागस्तु विभावपता कार्यो भावे भूमिरुदकन्त
णानि कल्याणीवाग्गिसेतानि वैसतोगारे नक्षीयन्ते
कदाचनेति तानेनान् परंब्रह्मेत्याचक्षते ते वांस्य इ
णे द्वादशरात्रमक्षारलवणभोजनमधश्शायनं ब्र
ह्मचर्यञ्च त्रिरात्रोपोषित उपेक्षणो परीगृह्णीयात्

बलिहरणं व्याख्यातम् ॥ ११ ॥ — नमः ॥

अथ प्रत्यवरोहणं वसन्तादौ मधुश्च माधवश्चेति
हुत्वा वासन्तिकैरलङ्कारैरलङ्कृत्य वासन्तिकानन्या
नि ब्राह्मणेभ्यो दत्वान्नशेषान् सगणः प्राश्नात्यथ
ग्रीष्मादौ शुक्रश्च शुचिश्चेति हुत्वा ग्रैष्मिकैरलङ्का
रैरलङ्कृत्य ग्रैष्मिकानन्यानि ब्राह्मणेभ्यो दत्वान्नशे
षान् सगणः प्राश्नात्यथ वर्षादौ नभश्च नभस्य
श्चेति हुत्वा वार्षिकैरलङ्कारैरलङ्कृत्य वार्षिकान
न्यानि ब्राह्मणेभ्यो दत्वान्नशेषान् सगणः प्राश्नात्यथ
शरदादौ इषश्चोर्जश्चेति हुत्वा शारदिकैरलङ्कारै
रलङ्कृत्य शारदिकानन्यानि ब्राह्मणेभ्यो दत्वान्नशेषा
न् सगणः प्राश्नात्यथ हेमन्तादौ सहश्च सहस्यश्चेति
हुत्वा हैमन्तिकैरलङ्कारैरलङ्कृत्य हैमन्तिकानन्या
नि ब्राह्मणेभ्यो दत्वान्नशेषान् सगणः प्राश्नात्यथ
शिशिरादौ तपश्च तपस्यश्चेति हुत्वा शैशिरिकैरल
ङ्कारैरलङ्कृत्य शैशिरिकानन्यानि ब्राह्मणेभ्यो दत्वा
न्नशेषान् सगणः प्राश्नात्यथाधिमासिके संसर्पोऽस्यं
हस्पत्याय त्वेति चैत्रिकैरलङ्कारैरलङ्कृत्य चैत्रिका
नन्यानि ब्राह्मणेभ्यो दत्वान्नशेषान् सगणः प्राश्ना
ति स एष आघारवान्वा स्यादग्निहोत्रिको वाप्या

पूर्विकोविति प्रत्यवरोहणं व्याख्यातम् ॥ ६२॥
अथाष्टका होमस्तैषे मास्यपक्षे स्याष्टम्यां क्रियेतैव
माघ एवं फाल्गुने यदि विहृते यद्युवै समस्त उपरि
ष्टान्माघ्याः पौर्णमास्या अपरपक्षस्य सप्तम्याम
ष्टम्यान्नवम्यामिति क्रियेतापि वाष्टकयामेव श्वः क
रिष्यामीति ब्राह्मणान्निमन्त्रयते योनिगोत्रश्रुतं वृ
त्तसंपन्नान् सम्बन्धानित्येके कामसम्बन्धानपि श्रु
तवृत्तसम्पन्नान् श्रुतवृत्तयोर्हि स्वधानिधीय
त इत्युपदिशन्ति तान् श्वोभूते श्मश्रुकर्माभ्यञ्जन
स्नानैर्यथोपपन्नं संपूज्य स्वयमाप्लुत शुचौ समे
देशे अथ देवयजनोल्लेखन प्रभृत्या प्रणीताभ्यः
कृत्वा बर्हिरादाय गामुपाकरोति पितृभ्यस्त्वा
पितामहेभ्यः प्रपितामहेभ्यो जुष्टामुपाकरोमी
ति तूष्णीमित्येके थैनामद्भिः प्रोक्षति पितृभ्यस्त्वा
पितामहेभ्यः प्रपितामहेभ्यो जुष्टं प्रोक्षामीति
तूष्णीमित्येके तामत्रैव प्रतीचीनशिरसीं दक्षि
णापदीं संज्ञपयन्ति तस्यै संज्ञप्ताया अद्भिरभि
षेकं प्राणानाप्याययति तूष्णीं तूष्णीं वपामुत्खिद्य
हृदयमुद्धरति प्रज्ञातानि चावदानानि तान्ये
तेष्वेव शूले श्रपनीक्ष्यै तस्मिन्नेवाग्नौ श्रपयति

पृथङ्मासञ्चौदनञ्चापूपान्श्च श्रपयन्त्स
न्यांश्च विशेषान् सर्वं सिद्धं समानीयायुग्मान् ब्रा
ह्मणान् सुप्रक्षालितपाणिपादानप आचमय्य
सदर्भोपक्लृप्तेष्वासनेषु प्राङ्मुखानुपवेशय उद
ङ्मुखान्वा ह यदि प्राङ्मुखान् दक्षिणापवर्गो
थ यद्युदङ्मुखान् प्रागपवर्गः प्राप्नोतु भवान् प्रा
प्नोतु भवानिति प्राप्नुवानि प्राप्नुवानीति इतरे
प्रत्याहुरथैनान्स्तिलमिश्रा आपः प्रतिग्राह
यत्यमुष्मै स्वधा नमोमुष्मै स्वधा नम इति तिलो
दकमेके समामनन्ति पुरोन्नाद्धि स्तिलोदकन्दद्या
त् भुक्तवत्सु च तृतीयमथैनान्वस्त्रगन्धपुष्प
धूपदीपमाल्यैर्यथोपपादं सम्पूज्य पृच्छत्युद्ध्री
यतामग्नौ च क्रियतामिति काममुद्ध्रीयतां कामम
ग्नौ च क्रियतामितीतरे प्रत्याहुरपि वाग्नौ करि
ष्यामीति कुरुष्वेतीतरे प्रत्याहुरथाभ्यनुज्ञातः

परिधानप्रभृत्याग्निमुखात्कृत्वाथ प्राचीनावीती
श्रृतायां वपायां पञ्चस्रुवाहुतीर्जुहोति नहुर
स्ताद्व्याख्यातम् याः प्राचीस्संभवन्त्याप उत्तरतश्च
याः अद्भिर्विश्वस्य भुवनस्य धर्त्रीभिरन्तरन्यं

पितुर्दधे स्वधा नमः स्वाहा । अन्तर्दधे पर्वतैर
न्तर्मह्या पृथिव्या । दिवा दिग्भिरनन्ताभिरूतिभि
रन्तरन्यम्पितामहाद्दधे स्वधा नमस्स्वाहा ।
अन्तर्दधऋतुभिस्सर्वैरहोरात्रैस्ससन्धिकैः
अर्धमासैश्च मासैश्चान्तरन्यम्प्रपितामहाद्दधे
स्वधा नमस्स्वाहा । यन्मे माता प्रलुलोभ चरत्य
ननुव्रता तन्मे रेतः पिता वृङ्क्तामाभुरन्योऽपपद्यतां
स्वधा नमस्स्वाहा । यद्वः क्रव्यादङ्गमदहल्लोकान्नय
न् जातवेदाः । तद्वो अहं पुनरावेशयाम्यरिष्टा
स्सर्वैरङ्गैस्संभवत पितरस्स्वधा नमस्स्वाहेति
त्रेधा वपां विच्छिद्यौदुम्बर्या दर्व्या जुहोति तत्
पुरस्तादाख्यातम् । सोमाय पितृमते इष्मिणे जु
हुमो हविः । ना जिन्निदञ्जुषस्व नः स्वजा हव्यन्देवेभ्यः
पितृभ्यः स्वधा नमः स्वाहा । अङ्गिरस्स्वन्तमूतये
यमं पितृमन्तमा हुवे वैवस्वतेदमध्यनस्व जा हव्यं
देवेभ्यः पितृभ्यः स्वधा नमस्स्वाहा । यदग्ने कव्य
वाहन पितॄन्यक्षृतावृधः प्रदेवेभ्यो वह हव्यम्
पितृभ्यश्च स्वजा हव्यं देवेभ्यः पितृभ्यस्स्वधा न
मस्स्वाहेत्यथाष्टका होमान् जुहोति । इयमेव सा
यम्प्रथमा व्यौच्छदिति पञ्चदशोयुष्टेय पूर्वतराम

पश्चान्निष्प्रान जुहोतीयमेव या सेकां संवत्सरस्य
प्रतिमामित्येकामनारस ल दशा था यूपमष्टधावि
च्छिद्य त्रीण्यवदानानि वपायाः कल्पेन हुत्वा ये
तराणि ब्राह्मणेभ्यो दत्वा त्रेतान्यवदानानीड
सूने प्रच्छिद्यौदनम्मांसं यूबमित्याज्येन समुद्ध
युत्यौदुम्बर्या दर्व्योपघातञ्जुहोति पितृभ्यः स्व
धानमस्स्वाहा पितामहेभ्यस्स्वधानमस्स्वाहा
प्रपितामहेभ्यः स्वधानमस्स्वाहा मातृभ्यस्स्व
धानमस्स्वाहा पितामहीभ्यः स्वधानमस्स्वा
हा प्रपितामहीभ्यः स्वधानमस्स्वाहा माता
महेभ्यस्स्वधानमस्स्वाहा मातुःपितामहेभ्यः
स्वधानमस्स्वाहा मातुःप्रपितामहेभ्यः स्व
धानमस्स्वाहा मातामहीभ्यः स्वधानमस्स्वा
हा मातुःपितामहीभ्यः स्वधानमस्स्वाहा मा
तुः प्रपितामहीभ्यः स्वधानमस्स्वाहा आचार्ये
भ्यः स्वधानमस्स्वाहा आचार्यपत्नीभ्यः स्वधान
मस्स्वाहा गुरुभ्यस्स्वधानमस्स्वाहा गुरुपत्नी
भ्यस्स्वधानमस्स्वाहा सखिभ्यस्स्वधानमस्स्वाहा
सखिपत्नीभ्यस्स्वधानमस्स्वाहा ज्ञातिभ्यस्स्व
धानमस्स्वाहा ज्ञातिपत्नीभ्यस्स्वधानमः स्वाहा

अमायेभ्यस्स्वधानमस्स्वाहा अमायाभ्यस्स्वधा
नमस्स्वाहा सर्वेभ्यस्स्वधानमस्स्वाहा सर्वाभ्यस्स्व
धानमस्स्वाहा अग्नये कव्यवाहनाय स्विष्टकृते
स्वधानमस्स्वाहेति दक्षिणार्धे पूर्वार्धे मांसोदनं
पात्रे भूद्धस विशेषानुपक्षिप्य हुतशेषेण संसृज्य
दक्षिणाग्रेषु दर्भेषु सादयित्वा दर्भैः प्रच्छाद्याभि
मृशति ॥ १३ ॥ पृथिवी ते पात्रं द्यौरभिधानं
ब्रह्मणस्त्वा मुखे जुहोमि ब्राह्मणानां त्वा विद्याव
तां प्राणापानयोर्जुहोम्यक्षितमसि मा पितॄणां
पितामहानां प्रपितामहानां क्षेष्ठा अमुत्रामुष्मि
न्लोके इत्यथैतानि ब्राह्मणेभ्य उपनिक्षिप्य ब्राह्मण
स्याङ्गुष्ठेनानखेनानुदिशत्यमुष्मै स्वधा नमो
मुष्मै स्वधा नम इति भुञ्जानान् समीक्षते प्राणे
निविष्टोमृतं जुहोमि इति पञ्च ब्रह्मणि म आत्माऽमृ
तत्वायेत्यात्मानं चात ऊर्ध्वं निरीक्षते ह्यकाद्दिपि
तर इति विज्ञायते सर्वैः कामैस्तर्पयन् स्वधन
युक्तानि ब्राह्मणान्यभिश्रावयन्रक्षोघ्नानि चै
ऋतानि च तृप्तानप आचमय्याशाये ष्वन्नशेषान्
सम्प्रकिरिरति ये अग्निदग्धा जाता जीवा येत
दग्धाः कुले मम भूमौ दत्तेन तृप्यन्तु तृप्ता यान्तु

परांगतिमिति संक्षालनेनावकीर्य दक्षिणाभि
राराधयति सुवर्णहिरण्यप्राणिवस्त्रलोहभू
मिभाण्डगोऽश्वाजाविकहस्तदासीपुरुषव्रीहि
यवमाषतिलदण्डोपानच्छत्रकमण्डलुयाना
सनशयनोपधानैस्सर्वोपकरणैर्यथोपपादं
सम्पूज्यास्समर्घ्यं वाचयित्वोपसंगृह्य स्वधां वाचयि
त्वोत्थाप्य प्रसाद्य संसाद्य प्रदक्षिणीकृत्य शेषमनु
ज्ञाप्यैतेनैव यथैतमेषामन्नशेषाणि वेदन्ते यथाब्रू
युस्तथा कुर्यात्तैस्समभ्यनुज्ञेयमथाभ्यनुज्ञातो द
क्षिणेनाग्निं दक्षिणाग्रान्दर्भान् संस्तीर्य तेषु अ
न्नशेषैः पिण्डान् ददाति पितृभ्यः स्वधा नमः
पितामहेभ्यः स्वधा नमः प्रपितामहेभ्यः स्व
धा नमः + सर्वाभ्यः स्वधा नमः इत्यथैनान्
संक्षालनेन त्रिरपसलैः परिषिञ्चन्नूर्जं वहन्ती
रमृतं घृतं पयः कीलालं परिस्रुतं स्वधास्थ तर्प
यत मे पितॄन् तृप्यत तृप्यत तृप्यतेति जयप्र
भृति सिद्धमाधेनुवरप्रदानादाचमने चाग्नि
मुखे चाभिश्रावणे चोपसंग्रहणेषु च पश्चा
द्धोमेषु च यज्ञोपवीतमथेतरत्र प्राचीनावी
तमेवमेवरूवाभूते मांसशेषेणैवमेव रूवाभूते

यदि त्र्यहमथ यदि गां न लभते मेषमजं वा ल
भत आरण्येन वा मांसेन यथोपपन्नेन खड्गमृग
मेषमहिषवराहपृषदंशशकशशरोहितशार्ङ्ग
तित्तिरिकपोतकपिञ्जलवार्ध्राणसानामक्षय्य
न्तिलमधुसंसृष्टं तथा मत्स्यस्य शतबले
क्षीरोदनेन वा सूपोदनेन वा यद्वा भवसामैर्वा
मूलफलैर्वा प्रधानमात्रं हिरण्येन वा प्रदान
मात्रं हिरण्येन वा प्रदानमात्रमपि वा गोग्रा
समाहरेदपि वानूचानेभ्य उदकुम्भानाहरेद
पि वा श्राद्धं मन्त्रानधीयीता यापि वारण्येना
कक्षमुपोवक्षेषामेष्टकेति नत्वेवानष्टकस्यात्
सिकता श्राद्धे पवित्रं येद्यध्यवसानाय यद्यव
किरणाय कुशाः कुतपो इति श्राद्धे पवित्रं यद्या
सनाय यदि परिस्तरणाय यद्युपवनाय ति
ला श्राद्धे पवित्रं यदि दानाय यदि भोजनाय
यद्यपां संसर्जनाय खरः श्राद्धे पवित्रं यदि मां
सं यद्यस्थिमयं पात्रं दौहित्रश्राद्धे पवित्रं यदि
भोक्ताय यदि परिवेष्टाय यद्यभिश्रावयन्त इत्य
ष्टका होमो न्याख्यात एवमेव मासि श्राद्धमपर
पक्षस्यान्यतमेहनि क्रियते तावदेव नानानात्रा

ष्टकाहोमो भवतीति स्वा इमास्सप्त पाकयज्ञसं
स्थानुकृतिरूपाकर्म व्याख्यातः॥ ॥१४॥
हुतापृथिवीते पात्रं। अथाष्टकाहोमः। अथप्रत्य
वरोहणं। अथवैश्वदेवं हुत्वा। अथबलिहरणम्
भवायदेवायस्वाहा। शुभिकेशिर आरोह। नमस्स्रा
कुलस्ज आभ्यां। इमंस्तोममर्हते। वेदमधीत्यस्नास्य
न्। अथशूलगवः। यस्मिन्नग्नावुपनयति। वेदमधी
त्यस्नास्यन्तीति। देवस्यत्वा। अथाहुताग्गर्भाष्टमेषु
संवत्सरे चूडाकर्म। षष्ठे मास्यन्नप्राशनम्। चतु
र्थेमास्युपनिष्क्रमणम्। अथानोयुगं रथयुगं
(अयैत हुते)
वा। अथप्रहुतोद्धातंकुमारं। ययैथभ्युते अथप्र
हुतोविंशतिः॥ ॥ हरिः ओं॥ इतिद्वितीयः प्रश्नः॥
हुतानुकृतिरूपाकर्म श्रावण्यांपौर्णमास्यां क्रियेतापि
वाषाढ्यां समन्वारब्धेष्वन्तेवासिष्वथदेवयजनो
ल्लेखनप्रभृत्याग्निमुखात्कृत्वा चतस्रः प्रधाना
हुतीर्जुहोति याज्ञिकेभ्योदेवताभ्यःस्वाहा सां
हितीभ्योदेवताभ्यस्स्वाहा वारुणीभ्योदेवताभ्य
स्स्वाहा सर्वाभ्योदेवताभ्यस्स्वाहेत्यथ काण्डऋषी
न्जुहोति प्रजापतये काण्डऋषये स्वाहा सोमा
यकाण्डऋषये स्वाहा अग्नये काण्डऋषये स्वाहा

विश्वेभ्यो देवेभ्यः काण्ड ऋषिभ्यः स्वाहा स्व
यंभुवे काण्डऋषये स्वाहेत्यथ सदसस्पतिं
जुहोति सदसस्पतिमद्भुतं प्रियमिन्द्रस्य
काम्यं सनिं मेधामयासिषँ स्वाहेत्यथ सावि
त्रीं जुहोति तत्सवितुर्वरेण्यमित्येतामथ वे
दाहुती जुहोत्यृग्वेदाय स्वाहा यजुर्वेदाय स्वा
हा सामवेदाय स्वाहाथर्ववेदाय स्वाहाथ
र्वाङ्गिरसेभ्यस्स्वाहेतिहासपुराणेभ्यस्स्वाहा
सर्पदेवजनेभ्यस्स्वाहा सर्वभूतेभ्यस्स्वाहे
ति श्रीनादितोनुवाकानधीयीरन् काण्डादीन्वा
सर्वान् जयप्रभृति सिद्धमा धेनुवरप्रदानाद
थ ब्राह्मणान्स्तर्पयस्त पूर्वे धानाभिस्सक्तुभि
रोदनेनेति युधुपते भ्यो भवति अथ हमेकाहं
वा नाधीयीरन् मासम्प्रदोषे नाधीयीरन्नित्य
त्रैव भुङ्क्तोर्ध्वमध्यरात्रान्स्तनिते सप्रदो
षमहरनध्यायोस्तमिते चोदयाद्विद्युति
च स्वप्नान्तमेवमेवमेव काण्डोपाकरण
काण्डसमापनाभ्यां सराकः काण्डऋषिः
तस्य चैवैकस्य काण्डस्याद्योनुवाकस्तस्य
चैवैकस्य काण्डस्यैतदहरनध्याय एवं

काण्ड विसर्ग एतावदेव नाना नाम्रानुवाकः
पौरोडाशिकं याजमानं होतारो होत्रं पितृमे
ध इति स ब्राह्मणानि सानुब्राह्मणानि प्राजापत्यान्या
ध्वर्यकं महादाक्षिण्यानि समिष्टयजूँषि उ
वभृथस्नानं जपेय इत्युक्रियाणि सर्पा
इति स ब्राह्मणानि सानुब्राह्मणानि सौम्यान्य
न्याधेयमग्निहोत्रमग्न्युपस्थानमग्निचयन
सावित्रनाचिकेत चातुर्होत्र वैश्वसृजारु
णा इति स ब्राह्मणानि सानुब्राह्मणानि आ
ग्नेयानि राजसूयः पशुबन्धा इष्टयो नक्षत्रे
ष्टयो देवयजनयाच्या स्साद्यायणमुपहोमा
स्सूक्तान्यो पानवाक्यं याज्या अश्वमेधः पुरु
षमेधः सौत्रामण्यः छिद्राणि पशुहोत्रमुप
निषद इति स ब्राह्मणानि सानुब्राह्मणानि वै
श्वदेवानि स्वायम्भुवं काण्डं काठके पठितो वि
धि स्वयंभूश्चात्र देवतं सर्वभूतपति इत्युषि
रिसथ कारीरि व्रतश्चतुरात्रमक्षारलवणं भू
मौ भुञ्जीत न पशुवदिर्त्रिमेवाकारं व्रतं सावि
त्रेभ्यः प्रश्न मोवध्यनुवाकात्तु नात्र
भूमौ भुञ्जीत न पशुवदिति ॥ १ ॥

आचार्यः प्रसूतः कर्माणि करोतीति विज्ञायते
आचार्यो वै ब्रह्मेति काण्डकाण्डव्रतचर्यार्थे यानि
ब्राह्मणानि सांवत्सरिकैर्व्रतैरध्येयानि भवन्ति
होतार इत्युक्रियाण्युपनिबद्धो गोदान इति होत्र
षु प्रधानकालेऽथ देवयजनोल्लेखनप्रभृत्याग्निमु
खात्कृत्वा यथोपदेशम् प्रधानाहुतीर्जुहोति या
ज्ञिकीभ्यो देवताभ्यो होतृभ्यस्स्वाहा सांहिती
भ्यो देवताभ्यो होतृभ्यस्स्वाहा वारुणीभ्यो देवता
भ्यो होतृभ्यस्स्वाहा सर्वाभ्यो देवताभ्यो होतृभ्यस्स्वा
हेत्यथ काण्डऋषीञ्जुहोति प्रजापतये काण्ड
ऋषये स्वाहेत्यथ सदसस्पतिं जुहोति सदस
स्पतिमित्यथ सावित्रीं जुहोति तत्सवितुर्वरे
ण्यमित्येतामथ वेदाञ्जुहोत्यृग्वेदाय स्वाहा
यजुर्वेदाय स्वाहा सामवेदाय स्वाहाथर्व
वेदाय स्वाहाथर्वाङ्गिरोभ्यस्स्वाहेतिहासपुरा
णेभ्यस्स्वाहा सर्पदेवजनेभ्यस्स्वाहा सर्वभू
तेभ्यस्स्वाहेति पालाशीश्च तस्रस्समिध आर्द्रा
स्सपलाशास्सप्ररोहाः प्रादेशमात्रीरप्रतिशु
ष्काग्रा घृतान्वक्ता अभ्याधापयन्वाचयति
याज्ञिकानां वा वृक्षाणामन्यतमस्याग्नेव्रत

पतेहोतारं व्रतञ्चरिष्यामि तच्छकेयन्तन्मे

राध्यताँ स्वाहा वायोर्व्रतपत आदित्यव्रतपते

व्रतानांव्रतपते होतारँ व्रतञ्चरिष्यामि जयप्र

भृतिसिद्धमाध्येनुवर प्रदानात् ॥ — २॥ —

संवत्सरमेतद्व्रतञ्चरेत् संवत्सरंहिव्रतं ना

ते स्वेतस्मिं स्त्वेवैतत् संवत्सरे धीयीत यद्युवा

ऽतस्मिन् संवत्सरे नाधीयीत यावदध्ययन

मेतद्व्रतञ्चरेदथ संवत्सरे पर्यवेते ध्यापयते

श्रावयते वाथ देवयजनोल्लेखन प्रभृत्याग्नि

मुखात्कृत्वा थावृत्य प्रायश्चित्तं जुहोति यन्म

आत्मनो मिन्दाभू पुनरग्निस्त्त श्चक्षुरदादितिद्वा

भ्यामथ यथोपदेशमेव प्रधानाहुतीर्जुहो

ति याज्ञिकीभ्यो देवताभ्यो होतृभ्यस्स्वाहा

सर्वाभ्यो देवताभ्यो होतृभ्यस्स्वाहेत्यथका

ण्डऋषीञ्जुहोति प्रजापतये काण्डऋषये स्वा

हेत्यथ सदसस्पतिञ्जुहोति सदसस्पतिमथ

सावित्रीञ्जुहोति तत्सवितुर्वरेण्यमित्येता

मथ वेदाहुतीर्जुहोति ऋग्वेदाय स्वाहा + भू

तेभ्यस्स्वाहेति पालाशीश्चात्र समिध आ

द्रा + अभ्याधापयन्वाचयति याज्ञिकानां

वावृक्षाणामन्यतमस्याग्ने व्रतपते होतारं
प्रथमचारिषन्तद्दशाकन्तन्मेराधि स्वाहा वा
योर्व्रतपत आदित्स व्रतपते व्रतानांव्रतपते
होतारं व्रतमचारिषन्तद्दशाक ॐ। अयमवा
न्तरदीक्षाकल्पः व्यार प्रवर्ग्यकल्पोक्तस्तस्या
श्रोपयुक्तत्वादत्र लिखितः। अथातो वान्तर
दीक्षाकल्पं व्याख्यास्याम उदगयन आपूर्य
माणपक्षे पुण्ये नक्षत्रे केशश्मश्रु वापयित्वा पूर्वव
दुपाक्रम्य ग्रामात् प्राचीं वोदीचीनं वा दिशमुपनि
ष्क्रम्य खिलेत् छदिर्दर्शेऽग्निमुपसमाधाय परि
स्तीर्य मदन्तीरधिश्रित्य प्रथमेनानुवाकेन शा
न्तिं कृत्वा दर्भैः प्रवर्ग्यदेवताभ्य आसनानि
कल्पयत्यग्रेणाग्निम्प्रवर्ग्याय कल्पयामि
घर्माय कल्पयामि महावीराय कल्पयामि
संराज्ञे कल्पयामि इति दक्षिणेनाग्निं ब्रह्मणे
कल्पयामि प्रजापतये कल्पयामीत्युत्तरेणा
ग्निमृषिभ्यो मन्त्रकृद्भ्यो मन्त्रपतिभ्यः कल्प
यामि यमायाङ्गिरस्वते पितृमते कल्पयामी
त्यथाप उपस्पृश्यासर्वाभ्यः प्रवर्ग्यदेवता
भ्यः कल्पयामीत्यथ प्रदक्षिणमग्निं चारतो

यज्ञोपवीती रुद्राय रुद्रहोत्रे कल्पयामीत्यथा
प उपस्पृश्य सर्वाभ्यः प्रवर्ग्यदेवताभ्यः कल्प
यामीत्यथ प्रदक्षिणमग्निम्परिषिच्य व्याहृती
भिर्वैकङ्कतीस्समिधोऽभ्याधाय मदन्तीभ्यः प्रव
र्ग्यदेवताभ्यः तर्पयामीत्यग्रेणाग्निम्प्रवर्ग्यन्तर्प
यामि घर्मन्तर्पयामीत्यथ दक्षिणतः प्राचीना
वीती महावीरन्तर्पयामि सम्राजन्तर्पयामीति
दक्षिणेनाग्निम्ब्रह्माणन्तर्पयामि प्रजापतिन्तर्प
यामीत्युत्तरेणाग्निमृषीन् मन्त्रकृतो मन्त्रपती
स्तर्पयामि देवान् घर्मपांस्तर्पयामीत्यथ दक्षिण
तः प्राचीनावीती रुद्रं रुद्रहोतारन्तर्पयामीत्यथा
प उपस्पृश्य सर्वाः प्रवर्ग्यदेवतास्तर्पयामीति
चतस्र औदुम्बरीस्समिधो प्रतिशुष्काग्रा घृता
न्वक्ता अभ्याधापयन्वाचयति पृथिवी समिदि
त्येतैः प्रतिमन्त्रमथ देवता उपतिष्ठतेऽग्ने व्रत
पते व्रतानां व्रतपतेऽशुक्रियं व्रतञ्चरिष्यामि
तच्छकेयन्तन्मे राध्यतां वायो व्रतपत आदित्य
व्रतपते व्रतानां व्रतपतेऽशुक्रियं व्रतञ्चरि
ष्यामि तच्छकेयन्तन्मे राध्यतामिति ॥२—४॥२
अथैनेषामनुवाकानाम्प्रभृतीर्वाचयति प्रथमो

त्तमयोर्वार्थैनं संज्ञास्ति सम्मील्य वाचं यच्छेत्सथा
स्याहतेन वाससा त्रिः प्रदक्षिणमग्निम्परिषिच्यं
समुखं शिरो वेष्टयति चितस्थ परिचितस्थस्वा
हा मरुद्भिः परिश्रयस्वेति प्रदक्षिणमग्निं परिषि
च्य व्याहृतीभिर्वैकंकतीस्समिधोऽभ्याधाय व्यामन्ती
भिः प्रवर्ग्यदेवताभ्यः तर्पयित्वोत्तमेनानुवाकेन
शान्तिं कृत्वाथास्तमिते आदित्ये ग्राममायाति
वाग्यतस्तिष्ठेत्तां रात्रिमुपविशेत् संविशेद्वाथ
प्रातरुदित आदित्ये पूर्ववदुपाकृत्य ग्रामात्प्राचीं
वोदीचीं वा दिशमुपनिष्क्रम्य खिले दिदृशेऽग्निमु
पसमाधाय सम्परिस्तीर्य मदन्तीरधिश्रित्य प्र
थमेनानुवाकेन शान्तिं कृत्वा दर्भैः प्रवर्ग्यदेवता
भ्य आसनानि कल्पयित्वा वयस्सुपर्णा इति वा
सो विमुच्य थास्य चरतयमभिविदर्शयत्यग्नि
मप आदित्यं गां ब्राह्मणं हिरण्यमिति त्रीनादितोऽनु
दर्शयित्वा यथोपपादमितराण्यादर्शयित्वा प्र
दक्षिणमग्निम्परिषिच्य व्याहृतीभिर्वैकंकती
स्समिधोऽभ्याधाय मदन्तीभ्यः प्रवर्ग्यदेवता
भ्यस्तर्पयित्वोत्तमेनानुवाकेन शान्तिं कृत्वाथा
स्य व्रतचर्यामुपदिशेन्न यानमारोहेन्न वृक्षमधि

रोहेन्न कूपमवरोहेन्न छत्रन्धारयीत नोपान
हौ धारयीत न सन्ध्यां शयीत न स्त्रियान शूद्रे
ण संभाषेत यदि संभाषेत ब्राह्मणेन सह संभा
षेत न सायं भुञ्जीत यदि सायं भुञ्जीतावज्व
लितं पर्यग्निकृतं भुञ्जीत न स्नायात् अष्ट
म्याम्पर्वणि चोपवसेत्तदहश्च स्नायाद्गाग्यत
स्तिष्ठेदतां रात्रिमुपविशेत् संविशो द्वामेध्यलो
हितशावपात्र दर्शने ज्योतिषां सन्दर्शनमेध्यन्द्
ष्टाजपत्यबद्धम्मनो दरिद्रञ्चक्षुस्सूर्यो ज्योतिषां
श्रेष्ठो दीक्षे मा मा हासीरित्यथ यद्येनमभिवर्षेत्सु
दन्तीर्बलं धत्तौ तेजो धत्त बलं धत्त मा मे दीक्षा
मा तपो निर्वधिष्टेति जपति —— ६ ॥ ——

Both. Reg. ] संवत्सरमेतद्व्रतञ्चरेत् संवत्सरँ हि व्रतन्नाति
ते त्येनस्मिंस्त्वेव संवत्सरेधीयीत यद्युवाए
तस्मिन् संवत्सरे नाधीयीत यावदध्ययनमेन
द्व्रतञ्चरेदथ संवत्सरे पर्यवेते ध्यापयते श्राव
यते वा पूर्ववदुपाक्रम्य ग्रामात्प्राचीं वोदीचीं
वा दिशमुपनिष्क्रम्य खिले छदिर्दर्शेऽग्निमुपस
माधाय सम्परिस्तीर्य मदन्तीरधिश्रित्य प्रथमे
नानुवाकेन शान्तिं कृत्वा दर्भैः प्रवर्ग्य देवता

भ्यः आसनानि कल्पयित्वाथा वृत्ते प्रायश्चित्ते
जुहोति यन्म आत्मनो मिन्दाभूत् पुनरग्निश्च
क्षुरदादिति द्वाभ्यां प्रदक्षिणमग्निं परिषिच्य
व्याहृतीभिर्वैकङ्कतीस्समिधोऽभ्याधाय मद
न्तीभिः प्रवर्ग्यदेवताभ्यस्तर्पयित्वा चतस्र औ
दुम्बरीस्समिधो प्रतिशुष्काग्रा घृतान्वक्ता अभ्या
धापयन्वाचयति यौ स्समिद्दिस्यैतैः प्रतिमन्त्र
मथ देवता उपतिष्ठते आदित्य व्रतपते शुक्रि
यं व्रतमचारिषम् तदशकन्तन्मे राधि वायो
व्रतपते ग्ने व्रतपते व्रतानां व्रतपते शुक्रियं
व्रतमचारिषन्तदशकन्तन्मे राधीति प्रदक्षि
णमग्निम्परिषिच्य व्याहृतीभिर्वैकङ्कतीस्समि
धोऽभ्याधाय मदन्तीभिः प्रवर्ग्यदेवतास्तर्प
यित्वोत्तमेनानुवाकेन शान्तिं कृत्वाथास्याध्याये
न स्वस्वाध्यायानुपदिशेन्नाधीयीत नास्तमित
आदित्ये नानुदिते न विप्रोषितो न पर्यावृत्तो ना
भ्रच्छायायान्नाहे ग्राम्यस्य पशोरन्तो नारण्यस्य
नापामन्ते न हरितयवान् प्रेक्षमाणो न दु
र्माणि न शरीराणि न लोहितमुत्सृज्य तन्दृष्ट्वा
न मांसमशित्वा न श्राद्धं भुक्त्वा न केशश्मश्रु

वापयित्वा नकेशान् प्रसार्य नदतो धावते
नाञ्जते नाभ्यङ्क्ते नार्द्रे नार्द्रेण वाससा नाव्रण
मनार्द्रया न्निमिस्य स्वाध्यायमधीयीतापरे
णाग्निं दर्भेष्वासीनो दर्भान्धारयमाणमपराची
नं स्वाध्यायमधीयीत यदि लौकिकमनुव्याह
रेत् शान्तिं कृत्वास्ते यत्र क्वच शान्तिं कृतं पश्ये
त् पुनरेव शान्तिं कृत्वाधीयीतामधीत्य चोत्त
मेन प्रवर्ग्यायोपनिष्क्रम्य नाप्रविश्य ग्रामादन्य
दधीयीतान्यधीयीत ॥२ — ६॥२ —— ❀ जन्मे p 66
राधिविहितिजयप्रभृति सिद्धमाधेनुवरप्र
दानात् ।२ — ३॥२ —— अथ शुक्रियाणि तेवा मुक्त
श्चरवं व्रतचर्यायोपनिषत्स्वयं देवयजनो
ल्लेखनप्रभृत्याग्निमुखात्कृत्वा यथोपदेशं प्र
धानाहुतीर्जुहोति याज्ञिकेभ्यो देवताभ्यः उप
निषद्भ्यः स्वाहा + सर्वाभ्यो देवताभ्य उपनि
षद्भ्यस्वाहेत्यथ काण्डऋषीन् जुहोति विश्वेभ्यो
देवेभ्यः काण्डऋषिभ्यस्वाहेत्यथ सदसस्प
तिं जुहोति सदसस्पतिमित्यथ सावित्रीं जुहो
ति+ भूतेभ्यः स्वाहेति पालाशीश्चत + मन्य
तमस्याग्ने व्रतपत उपनिषदं व्रतं चरिष्यामि

तच्छकेयं + उपनिषदं व्रतञ्चरिष्यामि तच्छ
केयन्तन्मे राध्यतां स्वाहेति जयप्रभृतिसि
द्धमाधेनुवरप्रदानात् ॥ ४ ॥

संवत्सरमेतद्व्रतञ्चरेत् संवत्सरं हि व्रतन्नातीते
त्यस्मिंस्त्वेवैतत्संवत्सरेऽधीयीत यद्युना त
स्मिन् संवत्सरे नाधीयीत यावदध्ययनमेत
द्व्रतञ्चरेदथ संवत्सरे पर्यवेते ध्यापयते श्रा
वयते वाऽथ देवयजनोल्लिखन प्रभृत्याग्निमु
खात्कृत्वा थावृत प्रायश्चित्ते जुहोति यन्म आत्म
नो मिन्दाभूत् पुनरग्निश्चक्षुरदादिति द्वाभ्या
मथ यथोपदेशमेव प्रधानाहुती जुहोति याज्ञि
कीभ्यो देवताभ्य उपनिषद्भ्यः स्वाहा + सर्वाभ्यो
देवताभ्यः उपनिषद्भ्यः स्वाहेत्यथ काण्डऋषी
ञ्जुहोति विश्वेभ्यो देवेभ्यः काण्डऋषिभ्यः स्वाहे
त्यथ सदसस्पतिञ्जुहोति सदसस्पतिमित्यथ सा
वित्रीञ्जुहोति तत्सवितुर्वरेण्यमित्येतामथ वे
दाहुती जुहोत्यृग्वेदाय स्वाहा + भूतेभ्यस्स्वाहेति
पालाशीश्चतस्रस्समिध + तमस्याग्नेव्रतपत
उपनिषदं व्रतमचारिषन्तदशकन्तन्मेराधि स्वा
हा वायो + ते व्रतमचारिषन्तदशकन्तन्मे राधि

स्वाहेति जयप्रभृति सिद्धमा धेनुवरप्रदाना
त् ॥ — ६ ॥ — षोडशवर्षे गोदानन्तस्य चौलव
त्तूष्णीं प्रतिपत्तिरवसानञ्चैतावदेव नानाप्रति
पत्तौ सर्वान्केशान्वापयति गुरवे वरन्ददात्य
ग्निगोदानो भवति तस्य काण्डोपाकरणकाण्डस
मापनाभ्यां प्रतिवेन्निरवसानञ्च सर्ववेदस
म्मितमित्याचक्षते तस्य द्वादश संवत्सरानेकादश
वत्सरानेकादशान्वत्सरान् पञ्च त्रीन् संवत्सरं ष
ण्मासांश्चतुरो मासान् द्वौ मासौ मासं वा व्रतञ्च
रेत्तस्योपदेशात् प्रतिपत्तिरवसानञ्चैतस्य नि
रोधि ब्रह्मचर्यन्त्रिषवणमभिषेको लघुशय्यामा
सनञ्च यन्मातुर्दुश्चरितन्तस्मादेनं त्रायत इत्यु
पदिशन्ति मन्त्रब्राह्मणं वेद इत्याचक्षते ॥ — ६ ॥ —

Bodh. p. 79

अष्टाचत्वारिंशत्सम्मितमित्याचक्षते तस्य सं
क्षेप संवत्सरस्तत्संवत्सरमनुव्याख्यासस्सय
दि ब्रह्मचारी स्यान्नियमेन प्रतिपद्येताथ यद्यब्र
ह्मचारी स्यात् केशश्मश्रुलोमनखानि वापयि
त्वा तीर्थं गत्वा आचम्य सुरभिमत्याब्लिङ्गाभिर्वा
रुणीभिर्हिरण्यवर्णाभिः पावमानीभिरिति मार्ज
यित्वान्तर्जलगतोघमर्षणेन षोडश प्राणायामान्धा

रयित्वोत्तीर्य वासः पीडयित्वान्यत् प्रयतं वासः प
रिधायाप आचम्य देवयजनमुदानयत्यथ देवय
जनोल्लेखन प्रभृत्याग्निमुखात्कृत्वाथ वित्यप्राय
श्चित्ते जुहोति नाहं करोमि कामः करोति कामः कर्ता
कामः कारयितैतत्ते कामकामाय स्वाहा नाहं करो
मि मन्युः करोति मन्युः कर्ता मन्युः कारयितैतत्ते
मनो मन्यवे स्वाहेत्यथ यथोपदेशमेव प्रधानाहुती
र्जुहोति याज्ञिकीभ्यो देवताभ्यस्सम्मितिभ्यस्स्वाहा +
सर्वाभ्यो देवताभ्यस्सम्मितिभ्यस्स्वाहेत्यथ काण्ड
ऋषीञ्जुहोति स्वयम्भुवे काण्डऋषये स्वाहेत्यथ सद
सस्पतिञ्जुहोति सदसस्पतिमित्यथ सावित्रीञ्जु
होति तत्सवितुर्वरेण्यमित्येतामथ वेदाहुतीर्जुहो
त्यृग्वेदाय + भूतेभ्यस्स्वाहेति चतस्र औदुम्बरी
स्समिधो प्रतिरुष्का गता घृतान्वक्ता अभ्याधाप
यन्वाचयति याज्ञिकानां वा वृक्षाणामन्यतमस्या
ग्नेव्रतपते ष्टाचत्वारिंशत् सम्मितं व्रतञ्चरिष्या
मि तच्छकेयन्तन्मे राध्यतां स्वाहा + व्रतपतेष्टा
चत्वारिंशत् सम्मितं व्रतञ्चरिष्यामि तच्छकेय
न्तन्मे राध्यताँ स्वाहेति जयप्रभृति सिद्धमाधे
नुवरप्रदानादेवमेव व्रतान्तो व्रतमचारिषमित्य

यैनाभुपरिजान्वा [illegible] द्यत्रिबवणमुदकमुपस्पृ
शन्ननग्निपक्वंचिरच्छयोपयोगोनागारं प्रवि
शेदन्यत्र गुरुनियोगात् भैक्षंवा तत्कालं भुञ्जी
त कामं कन्दमूलफलं अपराह्णे प्रसिद्धमुपस्पृश्य
तदपिनोपयुञ्जीत स्त्रीशूद्रपतितरजस्वलाभि
श्च सहनसंभाषेत कामम्मातरमुपाध्यायिनीम्
भगिनीञ्च याश्चान्यास्तं युक्तास्त्रियोशाक्तामपरा
क्रमे सप्रणवाव्याहृतयः प्राणायामं अग्नीन्धन
भैक्षचरणस्थानासनसवनोपस्पर्शनसुमनोनि
वेदनानिच सम्मितदेवतास्तर्पयति ब्रह्माणन्तर्प
यामि· प्रजापतिन्तर्पयामि परमेष्ठिनन्तर्पयामि स्था
णुन्तर्पयामि शिवन्तर्पयामि शर्वन्तर्पयामि बहुरूप
न्तर्पयामि स्कन्धन्तर्पयामि इन्द्रन्तर्पयामि यम
न्तर्पयामि ऋषींस्तर्पयामि पितॄंस्तर्पयामि सर्वा
स्सम्मितदेवतास्तर्पयामि इति प्रसंख्याय समा
प्नुयात्· गुरोस्समानवृत्तिषु गुरुवृत्तिस्स्यात्
प्रोषितस्तदेवप्रतिपद्येत नात्र पातकादेवद्वा
दशसंवत्सरानेकादशनवसप्तपञ्चत्रीन् सं
वत्सरं षण्मासान् श्चतुरोमासान् द्वौमासौ
मासं वाब्रतञ्चरेदपि वायोनूचान श्रोत्रियस्स

द्वादशरात्रमपराकं व्रतञ्चरेन्नलेवासम्मितः
स्यात् स एषञ्चरति दशपूर्वान्दशपरानात्मानञ्चै
कविंशतिपङ्क्तिञ्चपुनाति यास्यामुपविशति
यस्मै ददाति यस्माच्चप्रतिगृह्णाति तत्सर्वम्पुना
ति व्रतसमाप्तौ वेदसमाप्तौ वा गुरुदक्षिणमाहरेत्
धर्मतो यथाशक्ति विषमंगतेत्वाचार्य उग्रतश्शू
द्रतो वाहरेत् सर्वतो वोग्रतश्शूद्रतोनाप्याचार्या
र्थस्याहरणन्धर्ममित्येके एतेन धान्वन्तरशौनब
हुरूप वार्षदस्कन्धेन्द्राणां व्रतानां समापनं ब्रह्म
भ्यसेन्द्रर्क सामयजुर्वा च्छान्दसमनुसवनं वाल
भतकाममिति ह स्माह बोधायनः ॥ ६ ॥ —
प्रभुतानुकृतिर्वास्तुशमनं स यत्र दशो बिलाप्रया
स्यन् भवति दशभ्यो वोर्ध्वं सदारस्साग्निहोत्रिक
स्तद्वास्तोष्पतीयं हुत्वा प्रयातीति सर्व एवाहिताग्नि
रित्येके यायावरु इत्येके यज्ञागारं कारयित्वा प्रथमम
ध्यवस्येच्च द्वास्तोष्पतीयेनशमयित्वाध्यवस्येत् तदु
हैके यजुषास्थूणा उच्छ्रयन्ति यजुषा वंशान यजुषा
च्छदीबि यजुषां भ्रणं यजुषा तल्पदेशं यजुषा
वास्तुमध्यं यजुषाग्निनिधानं स यद्युहैवं कुर्या
द्यथा यजुर्बोद्धृते सदस्यर्क सामयजूंष्यं वर्णिया

न्याङ्गिरसानि मिथुनीभवन्तीति तदध्यवस्ये
यथा मिथुनी संभवन्त्यावध्यवस्येत्यादिकं तद्य
जुष्कृतं स्यादाधयो व्याधयो ग्रहा उपसर्गाश्चाप
णन्युस्तस्मात्तूष्णीमगारं कारयित्वोत्तरपूर्वे देशे
गारस्य गृह्याग्निमुपसमाधाय सम्परिस्तीर्या
ग्निमुखात्कृत्वा पक्वाज्जुहोति वास्तोष्पते प्रतिजा
नीह्यस्मानिति पुरोनुवाक्यामनूच्य वास्तोष्पते
शग्मया संसदा त इति याज्यया जुहोत्यथाज्याहु
तीरुपजुहोति वास्तोष्पते ध्रुवा स्थूणा रसत्रं सोम्या
नां द्रप्सो भेत्ता पुरां शाश्वतीनामिन्द्रो मुनीनां
सखा स्वाहा गृह्यं भयं यच्चेद्विपात्सु यदुचे
चतुष्पात्सु भयं यदस्ति अग्निर्यविष्ठः प्रणुदतु
तत् यदशान्तः प्रजाभ्यश्शमुनः पशुभ्यस्स्वाहा
अक्षिस्पन्दे कुचल्लने च यत् भयं यद्वाशिते यदुचे
दुरुक्ते अग्निर्यविष्ठः प्रणुदतु तद्भयं शन्नः प्रजा
भ्यश्शमुनः पशुभ्यस्स्वाहा दुस्स्वप्ने पापस्वप्ने च
यद्भयं स्वमाशने यदमेध्यदर्शने - अग्निर्यविष्ठः
प्रणुदतु तद्भयं शन्नः प्रजाभ्यः शमुनः पशुभ्यः
स्वाहा वास्तोष्पते प्रतरणोन एधि गयस्थानो
गोभिरश्वेभिरिन्दो - अजरासस्ते सख्ये स्याम पितेव

पुत्रान् प्रति नो जुषस्व स्वाहा । अमीवहा वास्तो
ष्पते विश्वा रूपाण्याविशन् सखा सुशेव एधि नः
स्वाहेति स्विष्टकृत्प्रभृति सिद्धमा धेनुवरप्रदाना
दथाग्रेणाग्निं दर्भस्तम्बं जुहुतशेषं निदधाति
नमो रुद्राय वास्तोष्पतये आयने विद्रवणे उद्याने
यत्परायणे आवर्तने विवर्तने यो गोपायति तं हुव
इति स्थालीसंक्षालनमाज्यशेषमुदकशेषं च पा
त्र्यां समानीयौदुम्बरशाखया पलाशशाखया
शमीशाखया दर्भमुष्टिना वा सर्वतः पर्यवोक्षन्
सर्वतस्त्रिः प्रदक्षिणमगारं पर्येति त्वं विप्रस्त्वं कविस्त्वं
विश्वारूपाणि धारयन् । अपजन्यं भयं नुदेस
न्नं संस्कृत्य ब्राह्मणान् सम्पूज्याशिषो वाचयित्वा
शिवं वास्तु शिवं वास्त्विति वास्तुशमनं व्याख्यातम् ॥४॥ VIII
अथ यद्यगारे स्थूणा विरोहेत् नवा यूरेकवो
तो वागारमध्ये धिपतेत्तच्छ्येनो वा गृहमारोहे
द्वायसो गृहं प्रविशेद् द्रौ वीगान्धारयेत् गौरास
न॰ प्रतिपद्येदग्निं ड्रान्वा यदि वमुल्लिखेदग्नौ वा
धूमो जायेतानग्नौ वा दीप्येत मधु वा जायेत व
ल्मीकं वोपजायेत छत्राकं निर्यासं वोपजायेत म
ण्डूको वां भ्रणे वाशये छ्छायां प्रसूयन्तो वा सस्रहवा

गृहपतिर्जाया वोपतप्यद्वि देवतान्येषु वा हुतोऽस्मा
ते अथ देवयजनोल्लेखनप्रभृत्याग्निमुखात्कृत्वा प
काञ्जुहोति यत इन्द्र भयामहे स्वस्तिदा विशस्प
तिरिति द्वाभ्यामथाहुतीरुपजुहोति वास्तोष्पते
वास्तोष्पते शग्म इन्द्राग्नी कया नश्चित्र आभुवत्
को अद्य युङ्क्ते भवतन्नः समनसाविति स्विष्टकृ
त्प्रभृति सिद्धमाधेनुवरप्रदानादथाग्रेणाग्निं
शमीपर्णेषु हुतशेषन्निदधाति शन्नो देवीरभि
ष्टय + वन्तुनः ब्राह्मणानन्नेन परिविष्य पुण्या
हं स्वस्त्यृद्धिमिति वाचयित्वा इति स्थालीसंक्षा
लनमाज्यशेषमुदकशेषञ्च पात्र्यां समानीय
तेषु स्नातेषु निनयेत् प्रोक्षयेद्वा तच्छंयोरावृणी
महइति अन्नं संस्कृत्य ब्राह्मणान् सम्पूज्याशिषो
वाचयित्वा शिवं शिवमित्यद्भुताव्याख्याताः ॥ ७४ ॥
आहुतानुकृतिरायुष्यचरुः संवत्सरे संवत्सरे षट्सु
षट्सु मासेषु चतुर्षु चतुर्षु चर्तावृतौ मासि मासि
वा कुमारस्य जन्मनक्षत्रे क्रियेताथ देवयजनो
ल्लेखनप्रभृत्याप्रणीताभ्यः कृत्वा व्रीहीन्निर्वप
त्यग्नय आयुष्मते वो जुष्टन्निर्वपामि इति वा तू
ष्णीं वा धान्यान्निर्वपति प्राणाय वो जुष्टन्निर्वपा

मीति वा तूष्णीं वा तानभ्युक्ष्यापहत्य त्रिष्फलीकृत्य
त्रिः प्रक्षाल्य निदधाति तण्डुलान्निर्वपति तानभ्युक्ष्या
पहत्य त्रिः फलीकृत्य त्रिः प्रक्षाल्यैव निदधात्यथ तिरः
पवित्रं स्थाल्यामपः पयो वा नीत्वाधिश्रियति तिरःप
वित्रन्तण्डुलानावपत्यथाज्यन्निर्वपत्यथाज्यमधि
श्रयत्युभयम्पर्यग्निकृत्वा मेक्षणं स्रुवञ्च सम्मा
र्ष्ट्यथैतञ्चरुं श्रपयित्वाभिघार्योदञ्चमुद्वास्य
प्रतिष्ठितमभिघारयति स एवमेव सर्वेषां स्थाली
पाकानाञ्चरुकल्पः — परिधानप्रभृत्याग्निमुखा
त्कृत्वा पक्वाज्जुहोत्यायुष्टे विश्वतो दधदिति पुरोनु
वाक्यामनूच्यायुर्दा अग्ने हविषो जुषाण इति याज्यया
जुहोत्यथाज्याहुतीरुपजुहोत्यथान्तरेणाग्निञ्चाज्य
स्थालीञ्च स्थालीपाकन्निधाय तस्य हस्त सम्पाताभि
हुतं करोति । यो ब्रह्मा ब्रह्मण उज्जहार प्राणैः शिरः कृत्ति
वासाः पिनाकी । ईशानो देवस्सन आयुर्ददातु तस्मै
जुहोमि हविषा घृतेन स्वाहा । विभ्राजमानस्सरिरस्य
मध्याद्रोचमानो घर्मरुचिर्य आगात् । स मृत्युपाशा
नपनुद्य घोरानिहायुषेनो घृतमत्तु देवः स्वाहा ।
ब्रह्मज्योतिर्ब्रह्मपत्नीषु गर्भं यमादधात्पुरुहूतं
जयन्तं । सुवर्णरंभग्रह मर्कमर्च्चन्तमायुषे वर्धया

मोघृतेनस्वाहा श्रियंलक्ष्मीमौपलामम्बिकां गांषष्ठींजयामिन्द्रसेनेत्युदायुः तांविद्याम्ब्रह्मयोनिंसरूपामिहायुषेतर्पयामोघृतेनस्वाहा दाक्षायण्यस्सर्वयोन्यस्सुयोन्यस्सहस्रशोविश्वरूपाविरूपाः ससूनवस्सपतयस्सयूथ्या आयुषेणोघृतमिदञ्जुषन्तांस्वाहा दिव्यागणाबहुरूपाः पुराणाः आयुश्छिदोनः प्रमथ्नन्तुवारान् तेभ्योजुहोमिबहुधाघृतेनमानःप्रजाँरीरिषन्मोदवीरान्स्वाहा एकःपुरस्तायइदम्बभूवयतोबभूवभुवनस्यगोपाः। यमप्येतिभुवनंसाम्परायेसनोहविर्घृतमिहायुषेत्तुदेवस्स्वाहा वसून्रुद्रानादित्यान्मरुतोथसाध्यानृभून्यक्षान्गन्धर्वांश्चपितॄंश्चविश्वान् भृगून्सर्पाश्चाङ्गिरसोथसर्वान् घृतंहुत्वास्वायुष्यामहयामशश्वत्स्वाहेति षड्विंशतिशतकलसदाहुतीनामष्टसहस्रंसम्पद्यतइत्तोत्तरस्मात्पञ्चात् सौविष्टकृतिञ्जुहोति जयप्रभृतिसिद्धमाधेनुवरप्रदानादथाग्रेणाग्निन्दूर्वास्तम्बेषुहुतशेषन्निदधातिमानोमहान्तम्मानस्तोक इतिद्वाभ्यामपरेणाग्निम्प्राङ्मुखउपविश्य

वाग्यतस्स्थालीपाकं सगणम्प्राश्नात्यथ तस्य प्राश
नमन्त्रः आयुरसि विश्वायुरसि सर्वायुरसि स
र्वमायुरसि सर्वम्म आयुर्भूयात् सर्वमायुर्गेषमि
ति प्राश्याप आचम्य जठरमभिमृशति यत इन्द्र
भयामहे स्वस्तिदा विशस्पतिरिति द्वाभ्यां कुमारा
णां ग्रहगृहीतानां जारगृहीतानां भूतोपसृष्टानां
आयुष्येण घृतसूक्तेनाहरहस्स्वस्त्ययनार्थं स्वाध्या
यमधीयीत एतैरेव मन्त्रैराहुतीर्जुहुयादेतै
रेव मन्त्रैर्बलीन्हरेदगदो हैव भवति तदेतद्
द्भमयनं भूतोपसृष्टानां राष्ट्रभृतां पञ्च चाम्या
स्सर्पाहुतीर्गन्धर्वाहुतीरहरहः स्वस्त्ययना
र्थं स्वाध्यायमधीयीत एतैरेव मन्त्रैराहुतीर्जुहु
यादेतैरेव मन्त्रैर्बलीन्हरेदगदो हैव भवति
तदेतद्द्भमयनं हुतप्रहुतानुकृतयोन्ये होमा
बलिहरणादनुकृतान्यभ्यर्चनान्याश्रमानुकृ
तयः संज्ञाया इति ॥ ७—१ ॥ अथातोर्धमासेष
म्यां ब्राह्मणा ब्रह्मचारिणस्त्रियश्चाहरूपवसथ
प्रदोषे रुद्रं विरूपाक्षं सपत्नीकं सस्तुतं सगणं
सपारिषत्कमावाहयामीत्यावाह्य गन्धपुष्पधूप
दीपैरभ्यर्च्य प्रतिपूरुषं पैष्टिकान्दीपानेका

तिरि ह्रांश्च स्रोष्टौ वा देवस्याय तेने प्रतिदिशं
प्रद्योतयस्व द्वीप्यस्व जातवेदो इति द्वाभ्यां हव्यवा
हँ स्विष्टमिति द्वाभ्यामथोपसमिधमग्निं कृत्वा
यदशीयस्य जुहोतीमा रुद्राय स्थिरधन्वने गिर इति
षड्भिरनुच्छन्दसम्मा नो महान्तमा न स्तोक इति
द्वाभ्यां वास्तोष्पते वास्तोष्पत इति द्वाभ्यां आर्द्रया
रुद्रो हेति रुद्रस्येति द्वाभ्यां द्वादश सम्पद्यन्ते
द्वादशमासास्संवत्सरस्संवत्सर एव प्रतितिष्ठ
तीति ब्राह्मणं समिधो वाध्याद धातीति विज्ञायते
वैष्णवा वै वनस्पतयो विष्णोस्सायुज्यं सलोकता
माप्नोति स्तुतिभिस्स्तुवन्ति ब्रह्म वै ब्रह्मा ब्राह्मण
स्सायुज्यँ सलोकतामाप्नोति स्तुतिभिस्स्तुवन्ति
सर्वम्पाप्मानन्तरति तरति ब्रह्महत्यामपपुनर्मृ
त्युञ्जयतीत्याह भगवान् बोधायनः॥

बलिहरणानुकृतिरुत्सर्गबलिं पौर्णमास्यां क्रियेता
पि वामाद्ध्यां सहान्ते वासिभिर्ग्रामात् प्राचीं वोदीचीम्
वा दिशमुपनिष्क्रम्य यत्रापस्सुतीर्थास्स्युरवगाह्याऽ
वन्योन्य कीन्य रशाङ्क्विन्य स्त्रा सामनङ्गला स्नात्वा प
आचम्य सुरभिमत्याब्लिङ्गाभिर्वारुणीभिर्हिर
ण्यवर्णाभिः पावमानीभिरिति मार्जयित्वान्तर्जले

गतोघमर्षणेन त्रीन् प्राणायामान्धारयित्वाची
र्यवासः पीडयित्वान्यत्प्रयतं वासः परिधायाप
आचम्याग्नेः समीपे स्थण्डिलानि कृत्वा दर्भानन्योन्य
स्मै सम्प्रदाय दर्भैरासनानि कल्पयति ब्रह्मणे कल्प
यामि प्रजापतये बृहस्पतये ग्नये वायवे सूर्याच
न्द्रमसे नक्षत्रेभ्य ऋतुभ्यः संवत्सराये इन्द्राय राज्ञे
यमाय राज्ञे वरुणाय राज्ञे सोमाय राज्ञे वैश्रवणा
य राज्ञे वसुभ्यो रुद्रेभ्यो आदित्येभ्यो विश्वेभ्यो
एतस्मिन् अहनि दद्यात् स एव एवं विहिता
वानाहिताग्नेस्त्रियाः पुल्लिङ्गः पात्र चयनेष्टका
केशवपनवर्जं पितुर्मातुराचार्यस्य वा क्रियेत

सहस्रदक्षिणो वान्यस्य सन्निष्ठते पितृमेधसन्नि
ष्ठते ॥ ७ — ५ ॥ — अत्र प्रश्नसमाप्तः पा अन्तरे ॥
यद्येतदाहिताग्निर्निमारं गच्छतः प्रतिकृष्य
प्रातरग्निहोत्रं जुहुयात् प्रतिकृष्यामावास्यां यजे
तेति तथैतेकर्मणि अभिसन्त्वरयेद्यथा जीवतः
कृतस्यातां स उ चेदहुतं प्रातरग्निहोत्रं निष्ठायाममा
वास्यायां प्रेयात्तदानीमेवास्य तूष्णीम्प्रातरग्निहोत्रं
यादृक्कीदृक्च होतव्यन्तदानीमेवास्य तूष्णीममा
वास्यायां यादृशीकीदृशी च यजेतेति स उ चेत् पुरा
गतस्यापुनरेवास्य प्रातरग्निहोत्रं काल्यमव्याप
न्नं होतव्यम् पुनरेवामावास्यां काल्यामव्यापन्नां य
जेतेति यद्येतन्नपयः समासिञ्चतीत्याचिक्षरा
र्थम्पयो विशेषयेयुरित्येवेदमुक्तं भवति यद्येत
दासन्धामित्यौदुम्बर्यामासन्द्यामित्येतदुक्तं भवति य
द्येतदन्तर्वेदि शरीराणां कृष्णाजिने पुरुषाकृतिं कृ
त्वा तेषूपरि पात्राणि कृत्वा कुशतरुणकैः प्रतिच्छाद्य
प्रसिद्धमुपोषयेयुरिति वा प्रच्चयनप्रभृति सिद्धमत
ऊर्ध्वमेतावदेव नानानात्र गोरालंभो नुस्तरणी काले
कुशतरुणकैरुष्ठकगोमयेन घृतेनेत्यनुस्तरणी याद
ग्नेर्वर्मपरिगोभिर्व्ययस्वेत्येतदेव पर्णसरुद्भिस पि

वा यथेष्टि कल्पेऽपि वा तूष्णीमेव सर्वं कृत्वान्यत्र गोरा
लं भादित्यपि तूष्णीमेव पात्राणि चित्वा कुशतरुण
कैः प्रतिच्छाद्य प्रसिद्धमुपोषेयुरिवान्यत्र गोरालं
भादिति ॥ ८ — ६ ॥ ८ — अथ वै भवति प्रजापतिः प्र
जाः सृष्ट्वा वृत्तोऽशयत् तन्देवा भूतानां रसन्तेजस्सं
भृत्य तेनैनमभिषज्यन्निति तत् पृच्छति कतः तत्
ब्राह्मणानां तेजो रसो येनैनमभिषिज्यन्ति चतुर्होता
र इत्येव ब्रूयात्तस्य संग्रहैः होतर्यिर्होमो भद्रसूक्तेन
भरणं पत्नीभिरुपसंवेशनं दक्षिणाप्रतिग्रहे निर्मा
र्गो हृदये हिरण्यशकलान् संभारैः पात्रद्वयोर्ज्यो
तिष्मतीभिरुपोषणं नारायणाभ्यां ब्राह्मण एकहो
तृतिश्चोपस्थानं प्रयासाय स्वाहा यासाय स्वाहेत्या
ज्याहुतिश्चित्तं सन्तानेनेति हविराहुतीर्मृत्युसूक्ते
नानुशासनं सौम्यया संगाहनमायुष्यावगा
हनं सौर्येणादित्योपस्थानमित्येतानेतान् परं ब्रह्मे
त्याचक्षते तान्नसाधारणे श्मशाने प्रयुञ्जीत
नानाचार्याय नाश्रोत्रियाय नागुरवे यतो तत
द्दवियज्ञियन्निर्वपनं म ॥ ८ — ७ ॥ ८ — यथो तत
द्दवियज्ञियन्निर्वपनं पुनर्दाहश्चेति यदहस्सञ्चि
नुयात्तदहरेवैतत् कुर्यात् कं भाक्तिसमाहित

ग्ने स्त्रियाश्च निवपनान्तं हवियज्ञयाजिनः
पुनर्दहनान्तं सोमयाजिनः चित्यन्तमग्निचितो
यदीतरे यदीतरमथोदकमुत्सिच्य दशरात्रमाशौ
च दशरात्रे शौचं कृत्वा शान्तिरथ यदि चितिश्चित्य
नोऽशौचश्चित्ताः प्राक् कर्पूर्य कृत्वाश्वो भूते यव
नेनैव प्रतिपद्यते सिद्धमत ऊर्ध्वमथैतेषामु
दकं सपिण्डानां सबान्धवानां मातुश्च योनिस
म्बन्धेभ्यः पितुश्चासप्तमात् पुरुषादाचार्यान्तेवा
सिनोश्च सपत्नीकानां सापत्यानां सपिण्डानान्द
शरात्रन्त्रिरात्रमितरेषां बाले देशान्तरस्थे च स
द्यश्शौचमित्येक एवमित्योदकतर्पणेनुस्मरणं
स्नायाज्यशिष्याणान्न प्राक् चौलात् प्रमीतानां
प्रमीतानां दहनं विद्यते नानुपनीतानां वा
पितमेधोनुपनीतानां कन्यानां वा पुनर्दहन
मन्त्रेण दहेपुनर्नाहिताग्नेः पात्रचयो विद्यते
नापशुबन्धयाजिनां गोष्ठगलानां सन्नयता
ममिक्षाणांनन्नग्निचितानाञ्चितिर्न स्त्रीणां केशव
पनं विद्यते न चितिर्नेष्टका न पुनर्दाहो दारुवत्
स्त्रीणां पात्राणि भवन्तीति विज्ञायते बह्वृचाम्पि
तमेधे स्त्रीणामिमान्मन्त्राननुपोद्धमेत् ॥ ८ ॥

इयन्नारी पतिलोकं वृणानि दोष्व नार्यभि जीवलो
कँस्वर्णँ हस्तादददनं हस्तान्मणि हस्तान्मे नमग्ने चःश्रतं
यदा दोतो भागस्तपसा स्वायं वेलम तदिदन्नाकं
लुकं यो ते ख्वानो धत्ते कृष्णान्दोहलन्तिष्ठ प्रहिब्रासा
त्वमस्यपतवीत स्वस्व पृथिवी मापि बाधिथा इति
मृतपत्नीकः क्रतुनाहरिबज्ज्ञायामुपयम्याग्नीनादध्या
द्विज्ञायते च तस्मादेको द्वे जाये विन्दते तस्मादेको ब
हीर्जाया विन्दत इति श्रुतपतिकाया औपासनेन पितृ
मेधोन लस्य अपतित्वात् पुनरग्न्याधेयं विद्यते वि
ज्ञायते च तस्मान्नैका द्वौ पती विन्दत इत्याहिताग्नि
मग्निभिर्दहन्ति यज्ञपात्रैश्चेत्यविशेषाज्जायापत्योरा
हिताग्न्योरित्येवमुक्तं भवति तयोर्यः पूर्वो म्रियेत
तस्याग्नित्रेतायां यज्ञपात्रैश्च पितृमेधः पश्चा
त्तस्यौपासनेन सह प्रभीतयोस्सहैकः पितृमेधः औ
पासनस्योल्मुकार्थत्वादौपासने विद्यमाने निर्म
न्थेन पितृमेध औपासनेनानाहिताग्निमित्यवि
शेषाज्जायापत्योरनाहिताग्न्योरित्येवमुक्तं भ
वति तयोर्यः पूर्वो म्रियेत तस्यौपासनेन पितृमे
धोयः पश्चात्तस्य निर्मन्थ्येनोत्तपनीयमेकेसमा
मनन्ति निर्मन्थ्येन स्त्रीकुमारान्दहयुरित्येकेषा

मृतपत्नीकस्याग्निभिर्जायायान्दग्धायामौपास
नेका प्रतिपत्तिरिति क्रतूंश्चेदाहरिष्यन्स्यात्
ब्राह्मौदनिकमेनं कुर्याद् नश्चेदातिष्ठेदौपासनमे
वापास्यन् स्यादात्मानञ्चेद्युञ्ज्यादात्मन्येवं समारो
पयेदथचेत् संन्यसेन्नैनमाद्रियेत यथोतत्
गृहानेष्यन्नुपकल्पयत इति स्वान् स्वान् गृहस्थ
धर्मान् प्रतिपत्स्यन्नित्येवमुक्तं भवति नाशुचिः
काम्यनाप आतिष्ठेन्न यजेन्न स्वाध्यायमधीयी
तान्यत्राग्निहोत्रदर्शपूर्णमासाभ्यां न दध्यात्
काममृत्विग्भ्यो दद्यात् कथमुखलु प्राचीनावी
तिना पितृमेधः कर्तव्यो यज्ञोपवीतिनेति प्रा
चीनावीतिना पितृमेधः कर्तव्य इत्येव ब्रूयात्
विज्ञायते च पितृणां वा एष मेधो देवानां वा अन्ये
मेधा इति निवीतिनस्त्वेवैनं वहेयुश्चितायां चा
दध्युश्चितायाञ्चादध्युः ॥ — ११ ॥ — अथ यदि
नष्टाग्निरपहताग्निर्विच्छिन्नाग्निरुत्सृष्टाग्निस्स
मारूढाग्निर्विधुराग्निर्वा यजमानः प्रेयाद्यस्य
पुत्रोन्तेवासि वा लङ्कर्मणि स्यात् प्राचीनावीति
कत्वोद्धृत्यापोक्ष्य यजमानायतने प्रेतन्निधाय
गार्हपत्यस्यायतने रणिन्निधाय प्रेतस्य दक्षिणम्बाहुं

मन्वारभ्य मन्थतीति यस्याग्नयो जुह्वतो मांसकामा
स्संकल्पयन्त्येजमानम्मांसञ्चायनन्दुतेहवि
वेसादिता यस्वर्गमिमं लोकम्मनन्यतीति म
थित्वाग्निनाहस तूष्णीं विहारं कल्पयित्वा गार्हप
त्य आज्यं विलाप्योत्पूय द्वादशगृहीतेन स्रु
चम्पूरयित्वा पुरुषसूक्तेन मनसानुद्रुत्याहवनी
ये जुहोत्येतेनैव गार्हपत्ये जुहोति तूष्णीमन्वा
हार्यपचने हुत्वात ऊर्ध्वं पैतृमेधिकं कर्म प्रतिपद्य
ते यथो तत्सरोक्षप्रेतस्य यजमानस्यास्थान्याह
त्य संस्कुर्यादिति कथमत्राहरणं विद्यत इति शिरस्तः
प्रथमं गृहीत्वा थोरस्तो थो जठरतो थो बाहुभ्यामथ
पत्त इति त्रयस्त्रिंशतमस्थानि गृह्णातीति विज्ञाय
ते त्रयस्त्रिंशत्पुरुष इस यैतान्यस्थान्यद्भिः प्रक्षा
ल्य कृष्णाजिनम्प्राचीनग्रीवमुत्तरलोमास्तीर्य
तस्मिन्नस्थानि संभरति इन्द्रो दधीचो ऽस्थभिरि
त्येतेनानुवाकेन अत्र तया देवतं करोति तया देव
तयाङ्गिरस्व ध्रुवा सीदेत्यथ सुदृदो हसः करोति ताऽस्य
सुदृदो हसस्सोमं श्रीपर्णिप्रइन यः जन्मन्देवानां
विशस्त्रि क्षारोचनदिव इति दीर्घवंशे विमथ्या
क्षारलवणाशिनो मृन्मय भोजना आहरन्ति तानि

ग्राममर्यादायान्निधायाग्निम्परिहृत्य पैतृमेधिकं
कर्म प्रतिपद्यन्ते नास्ति यजमाने ग्राममर्यादाम
न्नातिहरेयुर्यद्यतीहरेयुरग्नयो लौकिकास्सम्पद्येरन्
विज्ञायते च पूर्वस्यन्यजमानोऽग्निभ्यः परिधायगृ
हानेति तस्मात् ग्राममर्यादान्नातिप्रवत्स्यथ यद्या
त्मानिसमारूढे ऽरण्यां वा म्रियेत यद्यस्य पुत्रोन्तेवासी
वालं कर्मणिस्स्यात् प्राचीनावीतं कृत्वाद्धर्यवोक्ष्य य
जमानायतने प्रेतन्निधाय गार्हपत्यस्यायतने लौ
किकमग्निमुपसमाधाय प्रेतस्य दक्षिणम्बाहुमन्वा
रभ्य जपति· उपावरोह जातवेद इति मन्त्रं स्वर्गा
य लोकाय न प्रजानन् आयुः प्रजां रयिमस्मासु धे
हि प्रेताहुतीश्चास्य जुषस्व सर्वा इत्यरण्योरग्नीन् स
मारोह्योपावरोह्य मथित्वा दिति तूष्णीं विहारं कल्प
यित्वा गार्हपत्ये जुहोति हिरण्यगर्भस्समवर्तता
ग्र इत्यन्नादनुवाकस्य प्रत्यृचं हुत्वा पूर्णाहुतीर्हुत्वा
त ऊर्ध्वम्पैतृमेधिकं कर्म प्रतिपद्यन्ते यथो एतत्
परोक्षप्रेतस्य यजमानस्य दिगेव प्रज्ञायते तादि
शं विहारं कल्पयित्वासौ वेहीति नामग्राहमाहूय प
र्णत्स्वरूपाणां कृष्णाजिने पुरुषाकृतिं कृत्वा तेषू
परि पात्राणि छित्वा कुशतरुणकेऽ प्रतिच्छाद्य

प्रसिद्धमुपोषेयुरित्यथ यदि दिगपि न प्रज्ञाय
ते इमान्दिशं विहारं कल्पयित्वा सा वेहीति नामग्ना
हमेवाहूय पर्णत्सरूणामेव कृष्णाजिने पुरुषाकृतिं
कृत्वा तेषु परिपात्राणि चित्वा कुशतरुणकैः प्रतिच्छा
द्य प्रसिद्धमुपोषेयुरित्यथ यदि यजमाने म्रियमाणे
पत्न्यालंभकास्यात् कथन्तत्र प्रायश्चित्तं द्वादशगृ
हीतेन स्रुचम्पूरयित्वा दुर्गाम्भास्वयतीमहाव्याहृ
तीर्हुत्वा तद्धर्मो राजेति द्वाभ्यां पूर्णाहुतिं हुत्वाथ
ऊर्ध्वम्पौत्रमेधिकं कर्म प्रतिपद्येत यद्यर्थिनो विन्दे
रंस्तेभ्यो धेनुन्दद्यादिति ‖ — १० ‖ — यद्येवड्ढंते
ग्निभिर्यजमानः पुनरागच्छेत् कथन्तत्र कुर्यादि
ति यज्ञीयात् काष्ठादग्निम्मथित्वाग्निमुपसमा
धाय सम्परिस्तीर्याग्निमुखात् कृत्वा पक्वाज्जुहोति
हिरण्यगर्भस्समवर्तताग्र इति द्वाभ्यामथाहुती
रुपजुहोति सहस्रशीर्षेत्येतेनानुवाकेन प्रत्यृचं
स्विष्टकृत्प्रभृति सिद्धमाधेनुवरप्रदानादपरेणा
ग्निं सौवर्णेन पात्रेण घटेन मृण्मयेन कृष्णाजि
नमृतावेतां रात्रिं वसति व्युष्टायाम्पुंसवनप्रभृ
ति जातकर्मण ३ कारयित्वा जघनार्धादन्नमपक्र
व्य जायेत जातकर्मण ३ प्रभृति संस्कारान्कार

यित्वा द्वादशरात्रमेतत् व्रतञ्चरेत् तथैव भा
र्यायाग्नीनाधाय ब्राह्मेणैन्द्राग्नेन पशुनायजेत
गिरिं गत्वाऽग्नये इष्टिं निर्वपेदायुष्मती शत
कृष्णलां दिशामेवेष्यावा यजेतात ऊर्ध्वमीप्सि
तैर्यज्ञक्रतुभिर्यजेतेति विज्ञायते हिरण्यगर्भ
स्संभूतो ब्राह्मणश्चीर्णनिर्णयः प्रसुप्तानं नवस्यापि
कुर्यादेवसमस्तुत इति विज्ञायते तस्मात्प्रोषितेयज
माने चतुर्विंशतिवर्षाणि परिपाल्याग्निहोत्रं संस्कु
र्यादिति यद्यश्रुतस्यादित्यथ यजमाने म्रियमाणे
पत्न्यालंभुकास्यात् कथन्तत्र प्रायश्चित्तं द्वादशरा
त्रेतिनस्रुचं पूरयित्वा दुर्गामनस्पतीम्यहाव्या
हृतीर्हुत्वा तद्धमोराजेति द्वाभ्यां पूर्णाहुतिं हुत्वा
ऊर्ध्वं पैतृमेधिकं कर्म प्रतिपद्येत यद्यर्थिनोवि
न्देरं स्तोभ्योधेनुन्दद्यादिति यद्याग्रयणेष्टिपशुचा
तुर्मास्याध्वराणामसमाप्तानां व्रतान्तराले प्रमी
येत यद्यस्य पुत्रोन्ते ब्राह्मणोऽशीवांश्चैकतन्त्रे समाप्नु
यात् पशुवत्वा भेतदेवसंपुरोडाशमामीयापावजेता
थैवं भवति तमसोवा एष तमः प्रविशति यआ
हिताग्निमन्येरग्निभिः संस्कुर्यादित्यथाप्युदाहर
न्ति शरीरदाहादाहवा अग्नयो भवन्ति मरणेश्रयोना

136

पातः दगयनेप्रमीयतेसौर्येणपथास्वर्गंलोकमे
तीतिविज्ञायते तासूर्याचन्द्रमसाविश्वभृत्तमा
मउदित्याहुतिभिरेवैनं पूर्वपक्षन्नयत्युदगयनआ
पूर्यमाणपक्षेदिवाकलन्तोश्रेयोमरणमित्युपदिश
न्ति अन्येषुवा नियमभूतेषु दीक्षितप्रमीतश्राय
श्चित्तवदेकाहे ईनेश्च कुर्यादिति ॥ ॥

यद्येकं कृते अथ यदिनष्टाग्निः इयन्नारीयज्ञो
एतद्धविः अथवै भवति अथो एतदाहिताग्ने
अथगृहानेव्वन ॥ हरिः ओम् ॥

अथातोद्विजातीनां दहन कल्पं व्याख्यास्यामो
जातस्य मनुष्यस्य ध्रुवम्मरण मिति विजानीया
ज्जातेनप्रहृष्येमृतेनच विषीदेकस्मादागतमभू
तमकस्मादेवगच्छति तस्मा ज्जातम्मृतम्चैव
सम्पश्यन्तिसुचेतस इती तस्मात् जातस्यवैमनु
ष्यस्यद्वौसंस्कारा व्रणभूतौ भवतोजातसंस्का
रामृतसंस्कारश्चेति विज्ञायतेजातसंस्कारेणेमं
लोकमभिजयति मृतसंस्कारेणामुंलोकं तस्मा
न्मातरं पितरमाचार्यम्पत्नीपुत्र मन्तेवासिनम
पितृव्य मातुलसगोत्र मसगोत्रं वादायमुपय
च्छेत दहन संस्कारेणसंस्कुर्वन्तिताविश्चव

ऋतीरोन्ये समानगोत्रं वा। अन्यस्य पुरोहितस्सह
स्सदक्षिणो ब्राह्मणो वैश्यस्य सगुणात्मना वा यथाहि
ताग्निमग्निभिर्दहन्ति यज्ञपात्रैश्च गृहस्थमौपास
नेन ब्रह्मचारिणं कपालसन्तापनेनानग्निमुक्तप
नीयेनेतरानेवमस्त्रियमथ यथाहिताग्निः पौर्ण
मासेन हविषेष्ट्वा सायं हुत्वा वा प्रमीयेताथ गार्हपत्य
आज्यं विलाप्योत्पूय स्रुक्स्रुवं निष्टप्य सम्मृज्य स्रुचि च
तुर्गृहीतं गृहीत्वोत्तरतो दक्षिणामुख उपविश्य गा
र्हपत्ये जुहोति त्र्यसो रयिष्ठानाय स्वाहेत्येवमेव प्र
होत्वाहायपचने निष्ठ्नात्वनीये दक्षिणतस्सक
दन्तिवाल्याकूर्चे वेद्यै दक्षिणेंसे दक्षिणाग्रं स्पृशन्नि
धाय प्राचीनावीतं कृत्वा दक्षिणोत्तानेन पाणिना
दक्षिणतस्स्रुचं सम्मार्ष्टि पितृभ्यस्त्वा मृसुञ्जिन्वेति
चातूष्णीं वाथाप उपस्पृश्या द्रुक्त्या सकृत्प्राश्याप आ
चम्य निर्णिज्य स्रुचं निष्टप्याद्भिः पूरयित्वा प्रेतस्य
प्राणस्थानेषु निनीया यथायतने सिकतास्सम्प्रकीर्य
दक्षिणाग्रान्दर्भान्संस्तीर्य स्रुचं विमुञ्चति।
सैव ततः प्रायश्चित्तिरिति ब्राह्मणमथ मरणसंज्ञा
ये यजमानायतने सिकतास्सम्प्रकीर्य दक्षिणाग्रा
न्दर्भान्संस्तीर्य तेषु दक्षिणाशिरसमेनं निपात्य

दक्षिणे कर्णे जपत्यायुषः प्राणँ सन्तन्वित्येत
मनुवाकं संज्ञानं विज्ञानमिति षोडशानुवाका
नेवमुत्तरेऽथ प्राणेषूत्क्रान्तेषु हिरण्यशकलमा
स्ये निधायाध्वर्युस्संभारानुपकल्पयते सर्वौ
षधश्चोदकुंभश्चाहतञ्च वासस्समूलं बर्हिर्हि
रण्यशकलांश्च गां रोहिणीं परशुञ्चाश्मानमूर्णा
सूत्रमौदुम्बरन्तल्पमौदुम्बरीं शाखां दधिमधुघृ
तमिति तिलतण्डुलांश्च यानि कानि च काष्ठानि
स्पन्द्यां शकुनिहसेतेस्य संभारा उपकॢप्ता भव
न्त्यथैवं पत्नी केशान्विस्रस्याद्भिरेनं स्नापयति
भ्राता पुत्रो वा तूष्णीम् ॥ — ८ ॥ —
अथाध्वर्युः प्राचीनावीती सर्वौषधेनो
दकुंभं पूरयित्वा तेन दशहोत्रा पत्नो ग्रं
स्नापयति चित्तिस्स्रुगित्येतेनानुवाकेनाथ
ग्राम्येणालंकारेणालंकृत्य न दमाला
माबध्नात्यौदुम्बरतल्पं समास्यांगुष्ठबन्धं
करोत्यथैनमहतेनोदीचीनदशेन वा
ससा समुखं प्रच्छाद्य भर्तारिगामादुप
निष्क्रम्याग्निभिस्सह यज्ञायुधानि च सं

अहोरात्र तस्याग्रेणसं आरान्दक्षिणतःपात्राणि
पश्चादग्निमिति निधायापसलैः परिस्तीर्यतं
बान्धवा सिञ्चति नोपविजयन्त स्त्रियपसलैः
परियन्ति वातास्ते वान्तु पतिपुण्यगन्धा मन
इक्षु भागा त्रइक्षु आनुलोमाः त्वचासुखाणः
प्रति परियन्त्येवं पथिचितायां मंससुखा
स्थिसौख्या वहन्तु लाम रुतस्सुकृताय त्र लोक
इति यथैत त्रिः पुनः परियन्त्येवं पथिचितायां
चिताविंसते श्मशानंनीत्वा दहनओ वये दक्षि
णा प्रत्यक् प्रवणमनिरिणं सुषिरमभंगुरं
वल्मीकंजागर्ति बहुलौबधि गोचर्ममात्रं
स्थण्डिलं भवतीति ब्राह्मणस्य धनुर्मात्रमा
त्रं राजन्यस्य रथचक्रमात्रं वैश्यस्य विमाय
शंकुभिः परिनिहत्य समन्तं स्पन्धया परित
नोत्यैनम मध्ये शकलेनोद्धत्यावोक्ष्यौदुम्ब
रशाखया पलाशशाखया वा सम्मार्ष्टि अपे
त वीत विचसर्पता तोयेत्रस्थ पुराणायेच
नूतनाः अहोभिरद्भिरक्तुभिर्व्यक्तं यमो
ददात्ववसानमस्मा इति दक्षिणत शाखा
मुदधि भिरवोक्षसथत्वादिदं यमो वसानं

पृथिव्या अक्रन्निमं पितरो लोकमस्मा इति
हिरण्यशकलमवदर्शयत्यपसर्पत प्रेताये
केचेह पूर्वजाः स्वस्ति नः कृणुत माभ्युपाति पुन
रागमिष्याम इति स्वेन वा परशुना वा दक्षिणाप
वर्गास्तिस्रः कर्षूः खात्वा तिलतण्डुलानाम्मुष्टिं
पूरयित्वा यमाय दहनपतये पितृभ्यस्स्वधानम
इति द्वितीयायां मृत्यवे दहनपतये पितृभ्यः
स्वधानम इति प्रथमायान्निवपति कालाय दह
नपतये पितृभ्यः स्वधानम इति द्वितीयायां
मृत्यवे दहनपतये पितृभ्यः स्वधानम इति तृ
तीयायां प्रथमेनैव मन्त्रेण तिस्रष्वनिवपेदिसे
के याश्लिष्टांस्तिलतण्डुलान् सर्वतस्त्रिः प्रसव्यं
परिकिरति यथा पिता पुत्रम्पश्यति ॥ — २१२ —

यथा पिता पुत्रम्पश्यति सखा वा सखिमागत
मेवमिमं पूर्वसक्तिन्नाः प्रेताः पश्यतमान्यथे
ति दक्षिणाग्रान् दर्भान् संस्तीर्य तेषु दक्षिणाग्रै
र्याज्ञिकैः काष्ठैः चितां कल्पयित्वा चितायान्द
क्षिणाग्रेषु दर्भेषु कृष्णाजिनन्दक्षिणाग्रीवमध
रलोममवस्तृणाति तस्मिन् दक्षिणाशिरसमुत्ता

नम्प्रेतन्निधायापसलैः परिस्तीर्य चितामूर्णा
सूत्रेणापसलैः परिवेष्टयति तमग्निमपसलैः
परिस्तृणाति दक्षिणेनाग्निं दक्षिणाग्रान् दर्भान्
संस्तीर्य तेष्वैकैकशोन्यञ्चिपात्राणि सादयित्वा
तूष्णीं सम्मृताभिरद्भिरुत्तानानि पात्राणि
कृत्वा प्रेतम्पात्राणि दारुचिताश्च प्रोक्ष्याज्यं
संस्कृत्य स्रुक्स्रुवं निष्टप्य सम्मृज्य स्रुचि चतु
र्गृहीतं गृहीत्वा व्याहृतीर्जुहोति। अथास्य सप्त
प्राणायतनेषु सप्त सु हिरण्यशकलान् प्रस
स्यास्ये नासिकयोरक्ष्णोः कर्णयोरित्यत्राभ आ
ज्यबिन्दून्वा मुखे प्रथममाज्यं निनीय दधि
मधु घृतमिति तिलतण्डुलांश्च समुदायुत्या
स्ये निवपत्यथ दशहोतारं सेवाग्रे नासिकयो
र्हृञ्जपदासीदिति सर्वेषु होतृपदेषु अनु
ब्रजत्यन्यत्र ब्रह्मोतृपदेभ्य आस्तामिति हि
वाचिषु चतुर्होतारम्मुखेक्षिकरयोर्हिः पञ्च
होतारं कर्णयोर्हिर्बह्वोतारं कीकासु हिरस्सप्तहोता
रमित्यथ स्रुक्स्रुग्रहान् गृह्णाति - तूष्णीं चतुर्जु
हां घृतं चतुरवप्योग्निहोत्रं दध्यवहराति

ध्रुवायाम्मध्यानीयसकृद्दधिच द्विर्घृतञ्चतु
स्सम्पादयति चतुरवत्तव पयोग्निहोत्रहवण्याम
पि वाज्यमेव सर्वास्वथपात्राणि परिष्पादयति
चिनोति तस्यदक्षिणेहस्ते स्फ्य स्रुवञ्चासादयति
सव्यउपभृतं पृषदाज्यं ग्रहणीञ्चोरसि ध्रुवाम
रणीच मुखेग्निहोत्रहवणीमेकाञ्च नासिक
योस्स्रुवाग्निहोत्रिकं पैतयज्ञञ्चाक्ष्णोर्हिरण्यशक
ला नास्यस्स्रुवौ वाश्विनकपालेच कर्णयोः प्राशित्र
हरणं शिरोवोर्वोरुलूखले मुसले दस्रुगावौ यदि
ग्रावाणो भवन्ति शिरसि कपालान्युबर्हेणञ्चल
लाटे एककपालमुदरे पिष्टो वपनीन्नास्यामा
ज्यस्थालीञ्जठरे न्यदारुपात्रीम्पार्श्वयोश्शूर्पश्छि
लावंक्षणयोस्सान्नाय्यकुम्भ्यौ यदि सन्नय भवत्य
ण्डयोर्दृषदुपले शिश्ने पृषारंशम्याश्च श्रुष्ठयोराग्नि
होत्रस्थालीञ्चान्वाहार्यपचन उपावहरणीयं कूर्च
शीरस्त उपसादनीयमवेदं शिखायामिडापात्र
ञ्च प्रणीताप्रणयनमितीममग्नेचमसं ॥ ३ ॥
इममग्नेचमसम्माविजिह्वरः प्रियो देवानां
मुतसोम्यानां एष यश्चमसो देवपानस्तस्मि
न्देवा अमृता मादयन्तामिति च समवशिष्टानि

पलीसन्नहनानि स्रुचौ चेतराणि सर्वाणि स
न्नह्य चान्तरेण सक्थिनी निवपति तं बान्धवा
स्सिञ्चन्ति नो प्रवीजयन्त्यथ पत्युदकुंभमादा
य शीर्षन्नधि निधाय त्रिरपसलैः परिषिञ्च
न्ति तमश्मनापरशुना वा किञ्चिदधस्तात्प्रहर
ति तान्धारा मनुमन्त्रयत इमा आपो मधुम
त्यो स्मिंस्ते लोके उपदुह्यन्तामिति द्वितीयम्परि
गतायाँ प्रहरति तान्धारा मनुमन्त्रयते इमा आ
पो मधुमत्यो ~~न्त~~रिक्षे ते लोक उपदुह्यन्तामिति
तृतीयँ परिगतायां प्रहरति तान्धारां मनु
मन्त्रयते इमा आपो मधुमत्यः स्वर्गे ते लोक उप
दुह्यन्तामित्यथाध्वर्युर्वा कुंभं भिनत्ति यदि पुरस्ताच्च
द्रवति पापीयान् भवति यदि पश्चाद्द्रवति वसीया
न् भवतीति ब्राह्मणमत्रैवो वसीदत्याधानोवधिव
नस्पतीनामालभ्योपोत्थाय कपालशेषा आपः
प्रेतस्य प्राणस्थानेषु निनयति दिवि जाता अप्सु
जाता इति गाम्पश्यति ब्राह्मणान् पश्यति हिरण्य
मालभते गुरवे वरन्दत्वा त्यथैन म्महतेनादीचीन
दशेन वससा कृष्णाजिनेन वा दक्षिणाग्रीवेणोत्तर

लोम्ना प्रोर्णोत्य ऊरुष्ठं बध्नं विस्रस्याथाग्नीनादीप
यति नेत्रकस्साम न्वाहार्य पचनं स्वर्दिवं गच्छ
तिसहैन्द्रामाहवनीयं पुरस्तात् सभ्यावसथ्यौ
तूष्णींवाथ वामे वोत्तरे ष्वग्निषु अथ संआरेभ्य पत्नी
भिश्च्योपोषेत् । गृहेत्र तु मुखो येन ब्राह्मण एकलोते
तिचोवस्थानं सुसमिद्धे ष्वग्निषु तमनुमन्त्रयते यं
घर्मोऽग्निमभिजिहर्ति होमान्यागति यान्ति सु
कृतिनो युधि युद्धाग्निहोत्रनिष्ठाः तनुत्यजो मोक्ष
विद्धो मनीषिणो विधूतपापा विरजा विशोकास्ता
न् लोकान् गच्छ सुगतिर्नाकपृष्ठं स्वधा नम इति
यद्युवा अनाहिताग्निर्भवति तं घर्ममनुमन्त्रय
ते यं घर्मो अग्निमभिजिहर्ति होमान्यागति या
न्ति युधि युद्धशूराः तनुत्यजो मोक्षविदो मनी
षिणः विधूतपापा विरजा विशोका स्तान् लोकान्
गच्छ सुगतिर्नाकपृष्ठं स्वधा नम इत्यथाप्रतीक्षाः
कनिष्ठप्रथमाः तीर्थमायान्ति तान् गोत्रमेथु
नो राजपुरुषो वा वारयति पश्चशाखयावा वतर
तेति पुनरागमिष्याम इत्युक्ते शानोप्यातुर
व्यञ्जनानिर्व कुर्वीरन् पांसूनो व्येकवाससो द
क्षिणामुखास्स कृदुपमज्यान्तीर्थे वविशन्ति

बद्धशिखा यज्ञोपवीतिनोप आचम्य प्राची
नावीतं कृत्वा दक्षिणाग्रान् दर्भान् संस्तीर्य तेषु
पूर्वाञ्जलिनोदकमादाय सव्यञ्जानुन्निधाय
दक्षिणामुखास्तिलमिश्रा आपस्तंमृससावे
तत्त उदकमित्येवं द्वितीयं तृतीयञ्च कृत्वास्ना
त्वापास आचम्य सन्त्वासिञ्चामि यजुषेतिशा
न्तिं कृत्वा ज्योतिष्मत्यादित्यमुपतिष्ठते उद्वयन्त
मसस्परीत्यथाप्रतिक्षाउकनिष्ठप्रथमा ग्राममाया
न्ति गृहद्वारे निम्बपत्रं प्राश्याप आचम्य गो
शकृत्सुवर्णमपोग्निं हविरसर्षपान् संस्पृश्याश्म
नीति छन्दोगे के यत्र च प्रेतस्य प्राणा उत्क्रान्ता
भवन्ति तत्रोदकमिश्रांस्तिलतण्डुलान् सम्प्र
किरन्ति स्वस्त्यस्तु नो गृहाणां शोवैशिवं वास्तं
मित ज्योतिः कृत्वागारम्प्रविशन्त्येकरात्रमुपोष्य
तेषामक्षारलवणभोजनमधश्शयनम्ब्रह्म
चर्यमादशरात्रात्सायम्प्रातस्तूष्णीमुपलेपि
ण्डान्निपृणुयात् सायम्प्रातस्सकृदुदकक्रिया
थैं वा पत्नीनाश्नीयाप्रकान्नस्य दशमेहनि त्रि
रुदकमुत्सिञ्चन्ति सर्वैर्मासाथैकादश्यामेकोद्दि
ष्टं कुर्वन्ति ॥ — ४ ॥ —

अथ हैके तूष्णीमितरेषामित्यत्रोदाहरन्ति भार्या
संज्ञिता नारी पुरुषो ब्राह्मणसंज्ञितः पाते होत्रसं-
स्कारा इतरे मन्त्रसंस्कारा इति ता ननुव्याख्यास्यामो
नुपेत उन्मत्तो जडोन्धो बधिरो मूकष्षण्डः कुष्ठी कि-
लासी कुब्जः खञ्जः कुणिर्व्यसन हीनाङ्गोधिकोङ्गः
समागतो ब्राह्मणो नाथो राजन्यो नाहिताग्निरनग्नि
रनग्निर्वैश्यस्त्रियोनुत्पन्नपुत्राः कन्याविधवाः कुत्सि-
नी वन्ध्या चेत्येषां प्राणेषूत्क्रान्तेषु हिरण्यशकलमा-
स्ये निधाय तूष्णीं स्नापयेत् श्मशानं नीत्वा मन्त्रेण
शाखयावा सम्मृज्य तूष्णीं तिल तण्डुलान् सस्तिवपेत
संप्रकीर्य चितां कल्पयित्वा चितायां प्रेतं निधायापस-
लैः परिस्तीर्याज्यमास्ये निनयेदिदौ आत्मनश्शरीरम
यजन्त आत्मात्मनस्त आत्मानं शरीरात ब्रह्म नि-
र्भिनत्ति भूर्भुवस्सुवरसौ स्वाहेति सा हि पूर्णा-
हुतिरपि वास्मात्त्वमधिजातोस्ययं त्वदधि जायताम्.
अग्नये वैश्वानराय सुवर्गाय लोकाय स्वाहेत्यनया
चवा वसुभ्यो रुद्रेभ्य आदित्येभ्यो विश्वेभ्यो देवेभ्य
स्साध्येभ्यो मरुद्भ्य ऋभुभ्यः पितृभ्यस्स्वाहेत्यनेन यजु-
षावात्रैव मन्त्रेण सिश्वातेनोपवीजयन्ति तूष्णीमुद
कुम्भेनापसव्यं परिषिच्य दुत्तपनीयेनाग्निना संयो-

जयेत्तीर्थेऽभिषिञ्चेत् प्रसिद्धमेकादश्यामेकोद्दिष्टं
कुर्वन्ति -- ५ --

यथो पतन्न पाकचौलात् प्रमीतानां दहनं विद्यते
नानुपनीतानां कन्यानानां वा पितृमेध इत्युक्तं कथमुख-
ल्वेषामुक्तसंस्कारो विद्यत इति असमाप्तशरीराणां गर्भि-
णां स्रावणमित्येके गर्भस्रावण इयं वा अग्निर्वैश्वानरोऽस्या
मेवैनं जुहोतीति ब्राह्मणं भूमौ निहत्य सचेलोवगाहेत
सद्यश्शौचमादन्त जननान्निरवननं प्रणवेन पादन्न जाता-
नां व्याहृतिविधानेन वा तस्य कः कर्मणः उपक्रमो भवती
ति निर्मथ्यं कुर्यान्निर्मन्थ्येन स्त्री कुमारान्दहेयुरित्युक्त्वा
दथगार्ग्येणालङ्कारेणालङ्कृत्य प्रेतं तत्रैव निधाय प्रेतमा-
ख्यातं चितायां उपकल्पनमपरेण चितामग्निमुपसमा
धाय संपरिस्तीर्य स्रुक् स्रुवन्निष्टप्याज्यं विलाप्योत्पूय
संमृज्य पर्णमयेन स्रुवेण मध्यमेन पर्णेन वा तत्सवितु
र्वरेण्यमित्यनुद्रुत्यैकादश कृत्वो गृह्णाति प्रजापतये स्वा-
हेति प्रथमाहुतिं जुहोति प्रेताया ममुष्मै यमाय वैवस्वता-
य स्वाहेति द्वितीयां दश वै पशोः प्राणा आत्मैकादशो यावा-
नेव पशुस्तत्सर्वं जुहोतीति ब्राह्मणं पर्णमयं स्रुवं च प्रेत-
स्योपरिष्टान्निधाय भूरिति मनसा ध्यायन्नुपोषत भुव इत्यु
पस्थानं सुवरित्यपोवगाह्याप्सु निमज्योन्मज्यो तीर्थे क

मुदकाञ्जलिन्दद्याति न चास्यात ऊर्ध्वं श्मशानं कर्तुं मा-
त्रियेत नोदकक्रिया वा युग्मे दिवसे त्रीन् पञ्च सप्त वा ब्राह्म-
णान् भोजयेदेकमपि वा भवन्त्या भैर्वा मूलफलैः प्रदानमात्रं
हिरण्येन वा प्रदानमात्रं सर्वेषु पदेषु स्वधास्थानेषु कुर्या-
दमुष्मा उपतिष्ठत्वममुष्मा उपतिष्ठत्विति -|- 6 --- |
आपद्युक्तं प्रेतविधानमेवं शस्त्र विषरज्जु जलाञ्चलमा-
कृत तरु पाषाण हुताशनानुच्छ्वासनादीनां मृतानां शरी-
रसंस्कारं वर्जयेत देशान्तर मृते संग्राम हते व्याघ्रहे-
ते वा शरीरमाध्याय विधिना दाहयेद्यदि तन्न विन्देत
काङ्क्षदर्शिने पराङ्कस्य सप्तप्राणास्तदाश्रेया इति मधु-
ना सर्पिषा वाभ्यज्य विधिना दाहयेदथ यद्यस्तकौशलैः
पृथिवीं शरीरं शिरः कुर्यान्मधुना सर्पिषा वाभ्यज्य वि-
धिना दाहयेदथ यद्यस्थान्यानीय तैः कृष्णाजिने पुरुषाकृ-
तिं कृत्वा मधुना + हयेद्यदि तानि न विन्देत पलाशवृन्ता-
interpolate?
नां वा [तैः कृष्णाजिने पुरुषाकृति कृत्वा मधुना ये] याज्ञिका-
नां वा वृक्षाणां कुशाग्राणां वा प्रादेशमात्राणि तैः कृष्णा-
जिने + हयेद्यदि जीवन् पुनरागच्छेत घृतकुंभे निम-
ज्योत्तीर्य स्नापयित्वा जतकर्मादिसंस्कारान् क्रियेरन्
द्वादशरात्रं तानि वृतानि त्र्यहं तानि वाथ स्नानं ततस्ता-
मेव जायां प्रतिपद्येत तस्यामविद्यमानायामन्यां कुमारीं

विन्देताथाग्निं नाथाय योत्ये नैन्द्राग्नेन पशुनेष्वा-
गृहं गत्वा युम्मतीमिष्टिन्निर्वपेदीप्सि तैर्यज्ञ क्रतुभिः
यजेतेति विज्ञायते ---१----
आहिताग्निश्चेत प्रलसन्मृयेत पुनस्संस्कारविधि
व्याख्यास्यामो दर्भान् समान नन्तं संस्थीर्य
तस्मिन् पलाशवृन्तैः पुरुषाकृतिं करोति चत्वारिंशा-
ता शिरः कल्पेते यदशभिर्ग्रीवां विंशत्यो रस्त्रिंशतोद-
रं पञ्चाशता पञ्चाशतैकैकं बाहुं तेषामेव पञ्चभिः प-
ञ्चभिरङ्गुलिरूपकल्पयतेष्टाभिशिश्नं द्वादशभिः वृष-
णमित्येतानि प्रक्ष्यथ भूमौ हिरण्यं निधायारणी नि-
धाय यादिशं यजमानो गच्छत्तांदिशं प्रक्ष्यमाणो ज-
पतु पावरेन ह जातवेद इति विहारं कल्पयित्वा गार्ह-
पत्य आज्यं विलाप्योद्धृय स्रुचि चतुर्गृहीतं गृहीत्वाहव-
नीये पूर्णाहुतिं जुहोति सप्तते अग्ने समिधस्सप्तजि-
ह्वा इत्यथ प्रेतसंस्कार महिती त्याह भगवान् बोधायनः -४--
अथ गर्भिण्या मन्तर्वत्नी मृतायेतात ऊर्ध्वं क्रियेत
श्मशानं नीत्वा दहनं जोषयेत्तस्य सप्तत्या सप्तत्यैः-
कैकपादं तेषामेव पञ्चभिः पञ्चभिरङ्गुलीरूपकल्प-
यते चितामपरेण सव्येन वा प्रेतस्य वा मादरं लिखेत
हिरण्यगर्भस्त्वमवर्तताग्र इत्यनुल्लेखनं च कुमारं

दृष्टमनुमन्त्रयते जीवतुर्मम पुत्रो दीर्घायुत्वाय वर्चस इति अथ
कुमारं स्नापयेयु हिरण्यमन्तर्धाय जीवता ग्राममानयन्ती यस्ते
स्तनश्शशय इति स्तनं प्रदाय तस्मिनुदरे ज्यानी जुहोति शता-
युधाय शतवीर्यायेति पञ्च प्रयासायस्वाहायासायस्वाहेति
एतेनानुवाकेन प्राणायस्वाहा व्यानायस्वाहेत्येतेनानुवाकेना
थ सूच्य वृणं कुर्यात् प्रेतं चितामारोप्य विधिना दाहयेत् अष्ट
धेनुतिलधेनुमिति च धेनुं दध्यात् । इति प्रसिद्धमेकाश्या-
मेकोदिष्टं कुर्वन्ति ------

अथातोऽस्थिसंचयनं व्याख्यास्यामो निर्वृत्तेऽग्नौकरणे
व्यहे त्र्यहे चतुरहे सप्तहे वा नवं कुम्भमादाय श्मशानं
नीत्वा तद्देशं गत्वा पलाशशङ्कुनौदंबरशङ्कुन्वा निहत्या-
ङ्गुष्ठेनोपकनिष्ठिकया वा मध्यमया वा सर्वाभिरङ्गुलीभिर्वा
सर्वास्थीनि समुच्छित्य क्षीरेण प्रक्षाल्य कुम्भेवाधाय क्षी-
रेण प्लावयित्वा घृतेन प्लावयित्वा घृतं निनयेदिदन्त आ-
त्मन शरीरमयन्त आत्मात्मनस्तु आत्मानं शरीरा-
त ब्रह्म निर्भिनत्ति भूर्भुवस्सुवरसौ स्वाहेति व्याहृती-
भिरपि वात्र वृतान्नेन कुम्भमभ्यर्च्याथ यदि न दहेयु रु-
त्मकान् पुनर्दहेयुरस्मात्त्वमधिजातोस्ययं त्वदधिजा
यतां अग्नये वैश्वानराय सुवर्गाय लोकाय स्वाहेति तथै-
वापिधानास्थिकुम्भं प्राचीमुदीचीमपरेणवापनिष्क्रम्य

ब्रह्म स्थान्यादाय नदीतीर्थसमुद्रेषु वाभ्यवहर-
न्त्यपि वा पुरुषसम्मितं गजसम्मितं वा गर्तं वा खा-
त्वा तस्मिन् कुम्भं निधाय पुनरभ्यर्च्य पुरीषेण प्र-
च्छादयेद्यावदस्थितावत् स्वर्गे महीयते॥ ।०--॥

अथातः परिव्राजकस्य संस्कारविधिं व्याख्यास्यामः
पृथिव्या मह्योभ्यामोषधीभ्यामिति शरीरं निधाय
भूमिर्भूमिमगान्माता मातरमप्यगात् भूयास्म
पुत्रैः पशुभिर्योनो द्वेष्टि स भिद्यतामिति उदकपात्रं
निधायाथ होतारमयीत्य तस्य दक्षिणे हस्ते कम-
ण्डलुं निधाय सप्तव्याहृतीभि यष्टिन्ददाति सखामा
गोपयेति यदस्यपारेरज उशिक्ययेन देवाः पवित्रेणे-
ति जलपात्रं भूमिर्भूमिमगादितुं दरेघटं पूरयेद-
ग्निनाग्निसमिध्यत इति शेषं संस्कारोश्वमेधफलं त-
त्रोदाहरन्ति सृगालश्ववायसाः खादन्ति चेद्दोषमाचा-
रयेत् कर्तुस्तस्मात्त्रिशङ्कं वेदीं प्रच्छादयेदिति बोधायनः ॥।-॥

अथैषा पत्नी संवत्सरमधश्शायीत क्षारलवणमधु
मांसानि कोगनीयान्यं वर्जयेदन्यत्र तिलेभ्यस्स रस
दक्षिणो वा पितृमेधस्तस्य श्राद्धं कुर्वन्ति एतेन विधि-
ना प्रेतं दहन्ति पश्यति पुत्रं पश्यति पौत्रं नश्रूद्रेषु
जायते नानपत्यः प्रमीत इतीह स्माह भगवान् बोधायनः ॥१२॥

अथैषा पत्नी अथातः परिव्राजकस्य अथातोऽस्थिसंचय-
नं अथातो मृवली: अथगर्भिण्यामन्तर्वत्न्यां मृतायां क्रिये-
त आहिताग्निश्चेत् आपद्युक्तं यथो पतन्नप्राकृचौ-
लात् अथ है केतूष्णीमितरेषां इममग्नेच मसं यथा
पिता नादिकारयेत् विष्णुं स्नाप्य हिरण्या-
द्यैस्संपूज्यान्ननिवेद्य च सावित्र्या जुहुयात् पक्वं सौवि-
ष्टमवदाय च विष्णोर्नुकेति षड्भिश्च हुनेदाज्याहुतिस्त-
तः स्विष्टकृद्य व्यवनहं स्यादरदानंच कारयेत्।

गुडपायसमिश्रान्नं बलिं दद्याच्च विष्णवे।
पानीयाचमनंचैव तांबूलंच निवेद्य च॥
सहस्रेत्यनुवाकेन कृत्वा विष्णुं प्रदक्षिणम्।
व्याहृत्य विष्णुमुद्वास्य कूर्चमग्निं विसृज्यच॥
अन्नशेषंच पक्वंच प्राशयेत् पुत्रलब्धये॥

इति बोधायन पूर्व कारिका समाप्ता

अभिवन्द्य मुनिं कण्वं तत्प्रसादान्निगद्यते।
प्रयोगरत्नमालेयं पितृमेधाख्य सूत्रगा॥
गोत्र नाम मृतस्योक्त्वा संकल्प्यैव तु संस्क्रिया। प्रा-
चीनावीतिना कार्यः प्रेतकर्मस्य सर्वदा।
निवीतिनोवहेयुस्ते ज्ञातयोन्येच वाहकाः॥
पुत्रः कर्ता सदा पित्रो र्ज्ञातयस्तु दसंभवे।

न पुत्रस्य पिता कुर्यात् पितृमेधं न कदाचन ॥
अथ स्नेहेन वा कुर्यात् सपिण्डीकरणं विना ।
स्वपुत्रभाव आसन्नस्सापिण्डः पितृमेधकृत् ॥
दक्षिणाग्नौ दहेदन्यः पित्राच्छिष्याच सोदरात् ।
गर्भस्रावे रजोवत्स्यात् पाते त्यागो विधीयते ॥
आजातमरणं भूमौ निखनेन्मन्त्रवर्जितम् ।
जातस्य मरणे प्रेतमलंकृत्य जपादिना ॥
अरण्ये निखनेत् तत्र मन्त्रः प्रणव एव तु ।
व्याहृतीभिस्सदशनं निखनेदथवा दहेत् ॥
देहेच्छेत् मलंकृत्य श्मशानं प्रति निर्हरेत् ।
चितां विधाय तत्पश्चाग्निमिज्य ज्वलयेत्ततः ॥
अपसव्यं परिस्तीर्य संस्कृत्याज्यं प्रमृजेत् ।
पालाशीं च स्रुवं तस्य सावित्र्यैकादशगृहान् ॥
गृहीत्वाग्नौ जुहोत्यर्धं प्राजापतय इत्यथ ।
प्रेतस्य नाम चोच्चार्य यमायेति स्रुवं ततः ॥
प्रेतदेहे निधायाथ भूरित्युक्त्वा दहेन्मृतम् ।
उपस्थानं भुव इति सुवरित्यवगाहनम् ॥
गृहीत्वा तस्य नामैकं निनयेदुदकाञ्जलिम् ।
तृतीये दिवसे विप्रान् भोजयेत् पञ्च सप्त वा ॥
त्रिवर्षादि दहेदेनमेकर्चावृत बन्धनात् ।

मृतास्ये स्वर्णमादाय स्नाप्याथ दहनं व्रजेत्॥
शाखयापेति संमृज्य भूमिमद्भिरपोक्ष्य च।
तिलान् तण्डुलान् क्षिप्त्वा चितां कृत्वा निधाय तम्॥
इदन्त आज्यं वातास्ते सिश्वातेनोपवीज्य च।
परिषिच्योदकुम्भेन दहेदुत्तपनाग्निना॥
दर्भेष्वग्निं समारोप्य पुनर्दर्भेषु निक्षिपेत्।
पुनस्तद्गृहीतोग्नि रेष उत्तपन स्मृतः॥
अस्मात्त्वमसि मन्त्रेण स्नात्वादद्याज्जलाञ्जलिम्।
स्यात्रिवर्षात् प्रभृत्येव नित्यं पिण्डोदकक्रिया॥
पञ्चम्याद्यस्थिचयनं भवेत्तत्तु विधीयते।
(तृतीयेह्नि नवमकुम्भमादाय दहनं व्रजेत्॥
तत्रास्थीनि समुच्चित्य क्षीरेण क्षालयेत्ततः।
तानि कुम्भे समोप्याथ पयसा पूरयेत् घटम्॥
इदन्त इति मन्त्रेण घटं कुर्यात् सुरक्षितम्।
एकादशेह्नि कर्तव्यमेकोद्दिष्टं यथाविधि॥
एष एव विधिः प्रोक्तं जलोन्मत्ताग्निकाङ्क्षिणाम्।
मूकान्धबधिरानाथ कुष्ठिव्यसनिनां तथा॥
कन्या वन्ध्या स्वैरिणीनां मृतौ तु क्रियवैश्ययोः।
अथोपनयनादूर्ध्वं होत्रसंस्कार इष्यते॥
भूमौ दर्भास्तृतायान्तं शाययेन्मृतसंशये।

जपेत्तु दक्षिणे कर्णे आयुषप्राणमित्यपि॥
संज्ञानं षोडशाद्येव मुत्तरे मरणे सति।
सुवर्णमास्येन्यस्यास्य संभारानु कल्पयत॥
वासस्सर्वौषध्यं बर्हिर्हिरण्यं दधि तण्डुलान्।
मधुशकृत च्छिलोरज्जुं शाखा मौदंबरीतिलान्॥
स्नपयेदुदकुम्भेन सर्वौषधियुतेन तम्।
चित्तीति वाससाच्छद्य प्रजेदादहनान्ततः॥
अग्ने हरेच्छवं पश्चात सम्भारानग्निमित्यपि।
अपसव्यं परिस्तीर्य बान्धवास्सर्व पव ते॥
सिश्वातेनोपवीज्यन्त वा तास्त इति सर्वतः।
त्रिमकृत्वा दक्षिणायान्तु भूमिं गोचर्ममात्रतः॥
विमाय शकृतस्थाप्य रज्जुना परिसंस्तरेत।
उद्धत्यापोक्ष्य तन्मध्ये शाखयापेति सम्मृजेत॥
तामदादित्युदस्यात्र स्वर्णन्यस्येदपेदिति।
कर्षूः खात्वा दक्षिणान्तस्तिस्रस्तत्र तिलैर्युतान्॥
तण्डुलान्विपेत्तासु क्रमान्मन्त्रैरिमादिभिः।
यथेति शिष्टान्विकरेत तण्डुलान् सर्वतोदिशम्॥
कल्पयित्वा चितां तत्र प्रेतभ्यस्य परिस्तरेत।
दद्याज्य तण्डुलांश्चैव संयुत्या स्यादिषु क्षिपेत॥
चित्तीति दशवाक्यानि द्विष्कृत्वो नासयोजपेत।

सर्वत्र गोत्र वाक्यान्त मासीदित्यनुवर्त ते॥
आस्ये तु पृथिवीहोता जपेद्वाक्य चतुष्टयम्।
अक्ष्णोर्द्विरग्निर्होतेति चत्वार्यास्तां तदश्विना॥
आसीद्वर्ज्यं तथा सूर्य मतिकर्मणद्वयेतु षट्।
षण्महाहविरित्येव पार्श्वस्थिषु जपेत्ततः॥
वाक्ये तु पञ्चमे सत्वा स्तामन्य क्वासीदिति क्रमः।
अथोदकुम्भं शिरसि निधाय त्रिः परिक्रमेत्॥
परिक्रमणमैकैक च्छिद्रं कुर्यादिमादिभिः।
कुंभं भित्वा कपालस्थाः प्राणेषु निनयेदपः॥
द्विविजातेषु गां पश्येदरं दद्यात् गुरोरपि।
प्रज्वाल्याग्निमथोपोषेदग्निस्सेनेति च क्रमात्॥
अनुवाकद्वयेनैवमुपतिष्ठेदथ गृहैः।
चितादि पञ्च संप्रोक्ता वाचस्पत्यादि कागृहाः॥
तृतीये सोम आदित्याद्वाघ्योता ब्राह्मणेत्यथ।
समिद्धे ग्नावयं घर्मो इति प्रोक्तानपेक्षकाः॥
तीर्थं गत्वा ततः शोकादाज्ञावान्येन वारिताः।
केशानाप्य ततस्नात्वा त्रिर्दद्युरुदकाञ्जलिम्॥
दर्भेषु तिलसंमिश्रमिदन्त उदकं त्विति।
शान्तिं कृत्वाथ सन्वेति सूर्यमुद्वयमित्यपि॥
उपस्थाय कनिष्ठाद्या गृहमायान्ति बान्धवाः।

निम्बपत्रं गृहद्वारे प्रविश्याचम्य ययु गृहम्॥
दशरात्रं भवन्त्येते लवणक्षारवर्जिताः।
दानहोमजपादीनि स्मृतिसिद्धानि वर्जयेत॥
गृहे तिस्त्रश्शिला स्थाप्य सायं प्रात बलिं क्षिपेत।
दक्षिणाग्रेषु दर्भेषु नाम्ना पिण्डतिलैस्सह।
एतत्त ओदनं चेति स्वधानमिति क्षिपेत॥
तूष्णीं तासु सकृद्दद्यात सायं प्रातर्जलाञ्जलिम्।
तृतीयेह्नि भवेदस्थि संचयः पूर्वमीरितः॥
दशाहमथ आशीनो ह्यक्षारलवणाशनः।
अश्मनो पतने प्राप्ते मूर्ध्नि जुहुयादृचः॥
पशुभ्यो मरणे चैव छागावोगं च द्वृक द्वयम्।
दशमेहनि सिञ्चन्तु सर्वे त्रि रुदकाञ्जलिम्॥
एकोद्दिष्टं ततः कुर्यात सपिण्डीकरणं न तु।
द्वादशाब्दत्सराद्दूर्ध्वं सपिण्डीकरणं भवेत॥
समावृत्तस्य संस्कार एव एव तु नान्यथ॥—
अथाश्रौत गृहस्य संस्कारोत्र विधीयते।
विच्छिन्नाग्नेर्निध्यायाग्निं कृत्वासंमार्जनात स्रुचः॥
हुत्वा चतुर्गृहीतेन सप्तेति व्याहृतीरथ।
पूर्वं देवादयं मात्वा द्वयमावर्तिनी तथा॥
हुत्वाथ पैतृमेधीयं कर्म कुर्यु यथाक्रमम्।

विधुरस्य निधायाग्निं स्मरन् पुरुषसूक्तकम्॥
जुहुयाद्द्वादशाज्येन विधवा या अयं क्रमः।
मृता नास्ति शिकृष्णेऽथ पक्षेऽथो दक्षिणायने॥
ता सूर्यचन्द्रमस्यत्र जुहुयात्तत् पृथक् पृथक्।
जले मृतस्य जुहुयादिमंमेवरुणे तृचौ॥
सर्पेण चेन्नमो अस्तु त्रिभिर्हुत्वाथ संस्क्रिया।
महाप्रस्थान शस्त्राग्निविषाद्यैर्बन्धि पूर्वकैः।
मरणे द्विज चण्डाल भिग्युद्बन्धन कारिते॥
पाषण्डिनापि शस्तस्य महापातकिनस्तथ।
गर्भपुत्रपतिघ्नीनां संस्कारो नैव विद्यते॥
आत्महन्तावमेध्येन लिप्ताकृष्टव्य पव हि।
द्वादशाब्दात्परं तेषां त्रितीया देकतोपि वा॥
नारायणबलिं कृत्वा क्लृप्ते देहेऽथ संस्क्रिया।
देशान्तरमृतस्यास्थि गृहीत्वा कृष्णचर्मणि॥
इन्द्रो दधीच इत्यस्मिन् कुर्यात तत पुरुषाकृतिम्।
कृत्वा तद्भत दिग्भागे दहेयुः पितृमेधतः॥
दिग्ज्ञानेन हि नाम्नै हि स्युक्त्वा दाहस्तु पूर्ववत्।
देहस्य करणे पर्ण सरूभिस्तु शिरस्तथा॥
चत्वारिंशद्दशगीवा त्रिंशतिर्वक्ष उच्यते।
त्रिंशत्कुक्षिरथोबाहू पञ्चाशत्तु पृथक् पृथक्॥

तेष्वेवाङ्गुल्यो ज्ञेया सम्पल्या कारयेत् पदौ॥
लिङ्गेष्टौ द्वादशान्ध्ये च देहक्लितिरितिस्मृतिः।
म्रियमाणस्य चेद् भार्या सूतिकर्तुमतीतुवा॥
दुर्गमिनस्वती हुत्वा महाव्याहृतिभिस्सह।
जुहुयात्तद्यमो द्वाभ्यां वरं दत्वाथ संस्क्रिया॥
बहुनात्र किमुक्तेन पितृमेध क्रियोच्यते।
पश्चादग्नेर्मृतं स्थाप्य तद्बाहुं दक्षिणं स्पृशेत्॥
परेयुवांसंसिद्धेग्नौ हुत्वा च स्नापयेन्मृतम्।
अलं कृत्य ततश्शुक्लसूत्रेणाङ्गुष्ठबन्धनम्॥
समुखं च नवेनैव वस्त्रेणाच्छादयेदिदम्।
अपेत्यादाय पूर्वन्तु तत्पुत्रः परिधाय च॥
अंसेषु पांसून् खल्वेति निदध्युः पत्त एव च।
अग्निं पूर्वं हरेत् पश्चात् पुषात्वेह्या ददे शवम्॥
भागध्वनास्त्रितीये तैर्निधाय त्रिः परिक्रमः।
कनिष्ठादिभिर्भविस्सव्यं सिश्वातेनोपवीज्य च॥
ज्येष्ठादयस्त्रिर्गच्छेयु बद्धकेशा प्रदक्षिणम्।
पूषेत्यादाथ गत्वार्ध्वं पूर्ववत् प्रदक्षिणम्॥
आदायायुरिति प्राप्य श्मशानं त्रिः परिक्रमः।
कृत्वा देशं मपेतेति मार्जयेत्पर्णशाखया॥
दक्षिणा प्राक् चितां कृत्वा पश्चादग्निं निधाय च।

परिस्तीर्य चितामग्निं दक्षिणे पात्रसाधनम् ॥
संस्कृत्य प्रोक्षणीं प्रोक्षेत् पात्राणि प्रेतकं चिताम् ।
गृहीत्वान्यानि पत्नीं तां इयं नारीति शाययेत् ॥
उत्थापयेदुदीर्ष्वेति मृतहस्ते निमार्जयेत् ।
सुवर्णेति सुवर्णेन चितायां सादयेन्मृतम् ॥
श्रोत्राक्षिनासिकास्येषु सुवर्णशकलान्यसेत् ।
अक्ष्णोश्चतुर्गृहीताभ्यां जुहुयाच्छिद्रमित्यृचा ॥
अर्द्धर्चाभ्यां तु कुम्भेन यच्चिदित्रिः परिक्रमेत् ।
अपो ह्याकुम्भमासीनः कुर्यादङ्कुष्ठमोचनम् ॥
मैनमित्यग्निनो पोषेत् शृतमित्यनुमन्त्रयेत् ।
त्य
सूर्यन्त इति जप्त्वायं चित्ते जेति संयुजेत् ॥
न पत्नस्य नवायव्यै हुत्वाग्नौ प्रहरेत् स्रुवम् ।
पूकेति नेति सूक्तेन नवर्चे नोपतिष्ठते ॥
जघनेन चितां तिस्रः कर्षूः खात्वा निनीयकम् ।
विकीर्य सिकताश्मानि त्रिर्ययुश्शिशुकादयः ॥
बध्वा शाखया गुल्बं यद्वै इत्यन्तरा ययुः ।
या सद्यादिति पश्चात्तु गुल्बं छित्वा ततो व्रजेत् ॥
अपश्यन्तो जलं प्राप्य यातेति स्नाप्य मृद्धराः ।
नामग्राहं निरुत्सिच्य तिलमिश्रजलाञ्जलिम् ॥
उध्वयन्ते सुपस्थाय वापयेयुश्शिरांसि ते ।

विदस्य निम्बपत्राणि स्पृष्ट्वा सर्षपगोमयान् ॥
गृहद्वारे सहामात्यैः सदीपं प्रविशेद्गृहम् ।
सर्षपांस्तण्डुलांश्चैव मृतदेशविकीर्य च ॥
अपात्र तण्डुलान्वासो घृतदीपं प्रदीपयेत् ।
नग्नपश्चादनाख्यं तु श्राद्धं पूर्षभिस्मृतम् ॥
नाग्नीयुस्तद्दिने सर्वे बलिः पूर्वोक्त एव हि ।
दशाह मध्य आसीरन् न क्षारलवणाशिनः ॥
ब्रह्मचर्यं भवेतेषां पत्न्यास्त्वामरणान्तिकम् ।
आशौचकाले स्मार्त्तानि वर्जनीयानि सर्वदा ॥
इयं नारी उदीर्ष्वेति विधुरस्य न विद्यते । ~~
आहिताग्ने विशेषोत्र प्रोच्यते संस्कृतिर्भवेत् ।
नाशापहारयोर्वह्नेः विधुरस्य च यज्वनः ॥
वयस्येति दक्षिणं बाहुं प्रेतस्यारभ्य मन्थनम् ।
व्युप्याग्निं दिशाज्येन पूर्वाग्नौ नरसूक्ततः ॥
जुहुयात् पश्चिमेन्यस्मिन् पितृमेधेन संस्कृतिः
आमारणीसमारूढे लौकिकाग्निं प्रकीर्य च ॥
उपेति दक्षिणं पाणिं स्पृष्ट्वाग्निमवरोहयेत् ।
आत्मारूढे विहृत्याग्निं सतु पश्चिमे ॥
हिरण्यगर्भ इत्येतं हुत्वोर्ध्वं संस्कृतिर्भवेत् ।

कर्ममध्ये मृतानां तु शेषं तूष्णीं समापयेत्॥
पश्वालंभे पुरोडाशो वह्निभिस्त्वैस्तु संस्कृतिः।
प्रातर्होमे निशि पेते मन्त्रवर्जन्तु हूयते॥
पक्षे कृष्णे मृते दार्शी तूष्णीमिष्टिः प्रवर्तते।
ज्वलत्स्व हूयमानेषु वह्निषु स्यान्मृते यदि॥
तूष्णीं मनस्वतीं हुत्वा यथा तन्तुमतिक्रिया।
अमन्त्रमग्निहोत्रं तु हुत्वाथो संस्कृतिर्भवेत्॥
अथ पूर्वव्यतिक्रान्ते स्युप्ते पथिकृदादयः।
विच्छिन्नाग्नेस्तु पूर्वोक्तं पेताधानं कथं भवेत्॥
हुत्वा परेति पूर्वाग्ना वन्ययोर्जुहुयां तया।
समानमक्ष्णोराहोमाद्धुत्वा पात्राणि सादयेत्॥
मुखेऽग्निहोत्रहवणीं स्रुवौ नासिकयोर्न्यसेत्।
प्राशित्रहरणं भित्वा श्रोत्रयोरेकपालकान्॥
पाकं ललाटे मध्ये चे ममग्ने च मसन्न्यसेत्।
जुहूमन्यां च बाहोस्तु ध्रुवा ह्यरणी अपि॥
मेक्षणं दक्षिणेंऽसे स्यात् सव्यत्लेपल्वयं न्यसेत्।
पृष्ठे स्याज्जठरे दारुपात्रं शूर्पे च बाह्ययोः॥
इडां कुक्षौ घृतस्थालीं श्रोण्योर्न्नियां पदद्वये।
ऊर्वोर्मुसलमन्यच्च लिंगे शम्यां वृषे शिलाम्॥
कूर्चं शिरसि चे पादे शिष्टं सक्थ्यन्तरान्न्यसेत्।

वह्नीन् विहारवत् स्थाप्य युगपज्ज्वलयेच्च तान्॥
निरूढयाजिने न्वह्नौ दक्षिणे श्रपयेच्चरूम्।
भागत्रितीयस्थानेषु निधायाथ परिक्रमः॥
भिन्द्यात स्थालीं श्मशाने वक्ष्यते सोमयज्वनः।
पश्चिमे श्रपयेदग्नौ वामिक्षां पात्रचायने॥
समाप्ते करयोर्मित्रावरुणाभ्यामिति न्यसेत्।
अरणीमजिनं शम्यां जुहूं संश्लेषयेच्छिलाम्॥
अन्यत्सर्वं तु पूर्वेण प्रोच्यते सोमयज्वनः। ----
अकामहतचित्तस्य श्रोत्रियस्य क्रियोच्यते॥
पैतृमेधकतन्त्रास्तु पूर्वं पश्चात्तु होत्रकान्।
परेयुवांसमन्त्रेण होत्र इत्यप नुवर्तते॥
तेषामन्ते सकृद्धोमः पूषात्वेत्यादिषु त्रिषु।
भर्त्ता स      वर्तेत तथेयन्नार्यतः परम्॥
सेनेन्द्रस्यानुवर्तेत स्वर्णं घर्ममनन्तरम्।
देवस्येत्यनुवाकान्तं पर्यायादश सप्तच॥
देवस्येत्यनुवाकस्यात् पूषास्तेनादिरन्ततः।
अजाङ्गामविमित्येता तया ताभिरश्वतरगर्दभौ॥
अन्यत्र तेनेत्येवं स्यात रथे षड्वाक्यसङ्गतिः।
हिरण्यशकलं त्वास्ये सुवर्णं घर्ममित्यपि॥
ब्रह्मेन्द्रन्नासिकाद्वन्द्वे शतं नियुतमक्षिणि।

सुवर्णकोशमित्यान्ताच्छ्रोत्रयोः पात्रचायने॥
अग्निर्यजुर्भिरित्येतमिममग्नेचमसन्यसेत्।
ज्योतिष्मतीत्वेत्येतत्तु मैनमग्नेनुवर्तते॥
सहस्राभ्य इति द्वाभ्यां दृशात्मक समाख्यकैः।
उपतिष्ठेत तैस्सर्वैः दीप्तमग्निमुपोषयेत॥
य एतस्य पथो मन्त्राः प्रयासायेति तैस्सह॥---

- हरिः ओम्-